3. Dasgupta, S.N., Yoga as Philoscphy and Religion, Motilal Banarsidass, Delhi, 1987.

4. Sampurnanand, Yogadarsana, Hindi Grantha Samiti, Luckmow.

5. Ingalls, Daniel i.H., Materials for the study of Navya-Nyaya Logic, Motilal Banarsidass, Delhi, 1988.

Gurudutta, K., Kashmir Saivism, Bangalore, 1949.

(ख)

(क) पद्यानुक्रमणी देखो। नामानुक्रमणी तथा।

(ग) स्थानानां च जनानां च शोध्यानेषोपपत्तये।।१।।

(घ) चन्दसी सूचिका चापि ग्रन्थादेः सूचयत्यमिह।

क्षम्यतामेष नः शिष्यः कुर्वंश्चापलमग्रतः।।१।।
गुरुषु विनयो नित्यं गुणलेशेन वर्जितः।।२।।
स्वस्त्यः श्रीमच्चुभ्रशंसाबलेन भूयासं पुनः।।३।।
स्वाधीनसर्वसिद्धीर्गौमारशासनः शिवम्।
क्रीडन्तीं मानसे नित्यं विनीतस्य शिवस्य मे।।४।।
अलं वाचां प्रसारेण गुरूणां पुरतः शिवः।
अनुक्रमस्य हृषाणानां मौनमेव समाश्रये।।५।।

सपदि भवतु भवतां, मानसे सत्प्रकाशः,
कृतिकवितेम कविता, भासतां तत्र नूतना।
सुरगिरि निहितमतिः, शिष्यलोकः प्रियोऽस्तु,
निजपरजनगणना-दृष्टिरस्मे तु चित्तात्।।६।।

मम च भवतु हृषे नित्यमेव प्रकाशः,
सुतनुचरणयुगली भावना मानसेऽस्तु।।७।।
बलमिदमथ मनसा नित्यमेवाद्रियं श्च
परमपुरुषकीनिताभावनां नो क्रियासम्।।८।।
सरसि सरसिजभूते हंसवाहे स्थिता सा
कुसुमसदृशा सुतनुर्गौरवर्णा भृशार्हा।
मम हृदयसरसि जे नृत्यतान्नित्यमेव
मम मतिरतिविमला भूयसा तेन भूयात्।।९।।

इति बुधजनचरणकमलचञ्चरीकस्य
शिवनारायणस्य कृतौ गणेशाञ्जलिः।
२.घ.ई.२ निर्वाणि १२.१२ वलभाम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ सरस्वती श्रुति महती न हीयताम् ॥

श्री चन्द्रदीपशुक्लः (विद्यारत्नम्)

व्याकरणाचार्य, साहित्याचार्य (स्वर्णपदक प्राप्त) साहित्यालङ्कार
सम्मानित प्राध्यापक रा० नि०दा० मुरारका संस्कृत महाविद्यालय
सम्पादक :— संस्कृतसम्मेलनम्
महासचिव : — वि० रा० सं० साहित्यसम्मेलनम्
चौक, पटना सिटी - ८ (बिहार)

निवास स्थानः
श्री महावीर स्थान
बाहरी बेगमपुर, पटना सिटी-६

पत्राङ्क..... दिनाङ्क.....

१९९३ नववर्षम्

कामः कल्पान्तकारी कलयति जगती-जीवनस्यायुरेतद्-
वर्षं तस्यैकखर्वं भवति सुविदितं कर्मभिस्स्वैर्न मुक्तैः ।
दुर्बुद्धेरुग्रकर्म-प्रशमनकरणे सौमनस्य-प्रसारे
आलिङ्गेत् श्रीवधूं तत् खलु वत्सरं स्यात् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

T.

DR. Satya Vrat Shastri
3/54 Roop Nagar
Delhi — 110007

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नं
द्वारा—नैहरनपुखर
तहसील देहरा, जिला कांगड़ा
(हिमाचल प्रदेश)
पिन 177104

दिनाङ्क 25-12-93

प्राप्तिकर्ता :—
1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-
   हि०क०-सं०-भाषा अकादमी
3. महाकवि श्री वाणभट्ट पुरस्कार-
   उत्तर प्रदेश संस्कृत अकादमी
4. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :— राष्ट्रिय पाठ्य पुस्तक बोर्ड .....]
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी } निवृत्त
हि०कला-संस्कृति एवं भाषा अकादमी]

प्रिय डॉ. सत्यव्रत शास्त्रिणः
सस्नेहं नमस्कृत्य ।

भावी वर्षोऽयं सुखदो ऽलङ्कृतो भानुमासैः
श्रुत्वा वाचं मधुरसभरां मानसं मोदमेतु ।
लक्ष्मीर्नित्यं वसतु सदने शुभ्रयानैरवाप्ता
सर्वेषां वः भवतु भवतां प्रत्यहं मानवाब्दिः ॥

भवदीयः
दुर्गादत्तः शास्त्री

डा. सत्यव्रत जी शास्त्रिणः
3/54 रूपनगर
नई दिल्ली

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवा में

डॉ० सत्यव्रत शास्त्रीजी
3/54 रूप नगर
नई दिल्ली

SENDER'S NAME & ADDRESS

दुर्गा दत्त शास्त्री, विद्यालंकार
राष्ट्रीय पुरस्कार प्राप्त
बाँध डाकघर नलेटी
ग्रा० [illegible] गोपीपुर (कांगड़ा) हि० प्र०

NO ENCLOSURES ALLOWED

दूसरा मोड़ Second Fold

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

TAJ MAHAL 503

(राज्यनिबन्धित संख्या-२०) दूरभाष ६४२३२४

बिहार-राज्य-संस्कृत-साहित्य-सम्मेलम्

प्रधानकार्यालय :—मुरारका संस्कृत महाविद्यालयः

चौक, पटना सिटी

क्रमांक 162 दिनांक 25/12/83

सृष्टब्दं १९९४ नव वर्षम् ॥

कालः कल्पान्तकारी कलयति जगती-जीवनस्याभुरेतत्।
वर्षं तस्यैक खण्डं भवति श्रुविहितं कर्मभिस्स्वेनयुक्तैः॥
दुर्वृत्तैरुग्र कर्म- प्रशमनकरणे- शौभनस्य- प्रसारे।
आनन्दस्य प्रदाने कव च हरमिदं नूतनं वत्सरं स्यात्॥

—चन्द्र दीप शुक्लः

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

To.

DR. SATYA VRAT SHASTRI

Res: 3/54 ROOP NAGAR

DELHI – 110007 (INDIA)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Dr. Sitanath Acharya, Sastri M.A. Ph. D.
Kavya-vyakarana-nyaya-tarka-tirtha vidyatirtha
(GOLD MEDALIST)
(Winner of Gopinath Gold Medal,
M. M. Premchand Tarkavagis Gold Medal,
Presidency Medal, University Medal,
Haridas Siddhantavagis and Nanilal Saha Prize
and National Scholarship etc.)
Reader ~~Lecturer~~ in Sanskrit, University of Calcutta.
Calcutta-700073

Residential Address :
A. F. 177
Rabindrapalli
P.O. Prafullakanan
CAL - 59
PIN - 743511

Date..... 18-3.94

प्रेषितसत्यव्रतशास्त्रिमहाभागानां सविधे विनम्रभावेदनम्

श्रीपादपद्मयुगलं भवतां हि सिद्धिदं
चिन्ताधकारहरणोचितभानुमन्तम् ।
नक्तन्दिवं विबुधवृन्दविवन्द्यमानं
श्रद्धाञ्चितेन मनसा प्रथमं नमामि ॥

भवतां पत्रो समासादितः ।
प्रार्थ्यार्थविषये तूर्णमनुसन्धास्यते तव ।
यथा स्यात् त्वरिता प्राप्तिस्तथा चेष्टिष्यते मया ॥

चित्तौदार्य्यं मया ज्ञातं भवतां संस्कृतात्मनाम् ।
अतः संप्रार्थ्यते किञ्चित् समयोचित वस्तु भोः ॥

यस्या वनोयं शतसंख्यया न्विता
तस्याः समृद्धिर्न यथा विबाधिता ।
भवेत् तथा प्रोज्यपयोऽभिवर्षणां
विधोयतामङ्ग पयोद वर्षुक ॥

इति

श्रीसीतानाथ शास्त्रिणः ।

Department of Sanskrit
Calcutta University

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

प्राप्तिकर्ता :—
1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-
   हि०क०-सं०-भाषा अकादमी
3. महाकवि श्री वाणभट्ट पुरस्कार-
   उत्तर प्रदेश संस्कृत अकादमी
4. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :— राष्ट्रिय पाठ्य पुस्तक बोर्ड .....
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी } निवृत्त
हि०कला-संस्कृति एवं भाषा अकादमी

ग्राम एवं डाकघर-नलेटी
द्वारा—नैहरनपुखर
तहसील देहरा, जिला कांगड़ा
(हिमाचल प्रदेश)
पिन 177104

दिनाङ्क 6-7-94

प्रिय भ्रातरः डॉ० सत्यव्रत शास्त्रिणः,

नमस्कृत्य ।

तनयो मे शाश्वती शर्मा, मिलितुमागमिष्यति ।
विश्वविद्यालये दिल्ल्याः प्रवेशेच्छुः सुतस्मृतः ॥
साहाय्यं तस्य कर्तव्यमेतास्मिन् शुभकर्मणि ।
भ्रातरो यत्र मे सन्ति कार्यसिद्धिः सुनिश्चिता ॥
दूरभाषस्य संख्येयमध स्तात्लिख्यते मया ।
तद्गेहस्य महाभागः कक्षमेतत्प्रदीयते ॥

S. K. SHARMA - 6447904

भवदीयः - दुर्गादत्तः शास्त्री

डॉ० सत्यव्रत शास्त्रीजी को: दिल्ली विश्वविद्यालय
एवं अध्यक्ष
सं० विभाग
"भूतपूर्व कुलपति श्री जगन्नाथ संस्कृत विश्वविद्यालय
पुरी" लय
3/56 रघुनगर, दिल्ली

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड

INLAND LETTER CARD

सेवायाम्

डॉ० सत्यव्रत शास्त्री जी
3/54 रणजीत नगर नई दिल्ली
3/54 Ranjit Nagar
NEW DELHI-110007

SENDER'S NAME & ADDRESS

NO ENCLOSURES ALLOWED

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

S. B. Volankar

M.A.,LL.B,I.P.S.(Retd).

Retired Senior Member P & T Board
and Addl. Secretary, Ministry of
Communications Govt. of India New Delhi
Ex-Member, Council of Management
Deccan College Post Graduate &
Research Institute Pune.
Ex-Member Sanskrit Dictionary Project
Deccan College, Pune.
Member Board of Studies for Sanskrit-Prakrit.
S. N. D. T. University, Bombay.
Ex-Member Sanskrit Advisory Board Sahitya
Akademi New Dehli.
Ex-Member Sanskrit Standing Committee
Govt. of Maharashtra
Ex-Member Marathi Mahashabdakosha Samiti.
Vice President M. M. Sahitya Sangh, Bombay.
Founder President Devavanee Mandiram.
Ex-Trustee. Maharashtra Bhavan, Bhopal.
Sanskrit Playwright. Poet Composer and Producer.
Founder Akhil Bharatiya Sanskrit Lekhak Sammelan.
Ex-Vice President Akhil Bharatiya Marathi Natya Parishad.
Chairman Adarsha Sanskrit Mahavidyalaya.
B. V. Bhavan, Bombay.
Life Member Bharatiya Viday Bhavan Bombay.
Chief Editor, Geervana Sudha (Sanskrit)
Ex-Member, Governing Council B. O. R. Institute Pune
Hon. Member O. S. Institute Thane.
Winner Raseshwar Award S. S. Sansad Bombay.
Dharare Bhasha Bhushana - A·B·B·S Sammelan.

INDIRA NIVAS
A. G. STREET.
BOMBAY 400 004.
INDIA
TEL. 382 19 19
386 26 85

Dated 16-8-94

डॉ. सत्यव्रत शास्त्रिभ्यो नमो नमः।

प्रेषयित्वाऽधुना सार्धं 'पत्रकाव्य'परीक्षणम्।
समाप्तिमोऽस्मि परमं भवादृक्ष प्रमाणतः॥१॥

प्राप्तमासीद् भवत्पत्रं तत्पूर्वं ज्ञातमेव यत्।
देहलीं हि भवान् याते नागतो नगरीमिमाम्॥२॥

आनायितं 'पत्रकाव्यं' कवीश्वरसहायतः।
प्रकृतेरस्वास्थ्यभरात् विलम्बः प्रेषणान्वितः॥३॥

द्वे प्रेषिते हस्तलिखिते द्वे इदानीं यथा भवान्।
मुद्रणार्थं प्रेषयति चैकं रक्षेदेकं स्वसंनिधौ॥४॥

कार्यबाहुल्यमपि मां रुणद्धि भृशमीदृशम्।
तथापि यदि रोचेत भवते कृतलेखनम्॥५॥

तत्सर्वमेव संपन्नं शुभान्वितमिति धारये
पुनः प्रणम्य सुहृदं विरमामि वचोभरात्॥६॥

स्नेहाङ्कितः
- श्रीरामः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

सुहृदे नमो नमः ॥

भवता लिखितं पत्रं पठितुं सुकरं न मे ।
तथापि सारमेवास्ति न संतुष्टो विमर्शनात् ॥

अस्वास्थ्यदृष्टेः प्रकृतेः कार्यजाड्यात्तोऽपि च ।
न पुनरस्तदयं दीर्घं विधातुं हि क्षमो जनः ॥

क्षम्यतां मे तु दौर्बल्यं क्षम्यतां मम लेखनम् ।
अन्यः क्षमतरः कोऽपि भवदाज्ञां प्रपालयेत् ॥

क्षमायाचकः

श्रीराम वेलणकरः

मुम्बापुरी 4

12 Sept 91

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

15 भारत INDIA

पोस्ट कार्ड POST CARD

Dr Satya Vrata Shastri

Roop Nagar

Delhi 7

पिन PIN 1 1 0 0 0 7

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

पुरी
13·9·94·

पूज्याः श्रीशास्त्रिपादा विबुधजनमनोहारिहारायमाना,
निर्विघ्नं सर्वशास्त्राम्बुधितटगमनेऽपश्चिमाश्चारुपुत्राः ।
देशे देशे च दक्षा निरलसमनसा देववाणी-प्रचारे,
प्रोद्यन्नक्षत्रतुल्याः सुरभितचरिताः काव्यवारांगनेशाः । 1 ।

पवित्रिते पादसरोजयुग्मके
नमोऽस्तु ते सूर्यमणेरपांशुलम् ।
गुरौ सदाज्ञानतमोविनाशने
किमस्ति वा देयमतः समुन्नतम् ।2।

व्यलेखि तावद् भवता मनोरमं, यदत्र पत्राभिधकाव्यमार्जवम् ।
रसेन चालंकरणेन भूषितं सुयोगतस्तन्मम दृष्टिमागतम् ।3।

तस्यावलोकनमहं स्वधिया विधाय
यच्चिन्तितं तदिहलेखगतौ निवेश्य
संप्रेषयामि भवदन्तिकमद्य तावत्
तीर्थाज्-जनाभिलषिताद् पुरुषोत्तमाख्यात् ।4।

कुत्रापि वैमत्यमथास्ति ते चेत्
हे पूजनीय । प्रतिभाविलासिन्
सारस्वते कर्मणि लिप्तचित्त!
पत्रेण तत् सूचयितव्यमेव ।5।

इति भवतामाशिषकामी सूर्यमणिः

सूर्यमणिः
डॉ· सूर्यमणिरथः
प्राध्यापकः,
श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः । पुरी ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

रजिस्टर्ड पत्रम्

दुर्गादत्त शास्त्री,
विद्यालङ्कार, साहित्यरत्न

दूरभाष—01970-45094
ग्राम एवं डाकघर—नलेटी
द्वारा—नैहरनपुखर
तहसील—देहरा
जिला—कांगड़ा
(हिमाचल प्रदेश)
पिन 177104

दिनाङ्क 8.9.17

प्राप्तिकर्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-(हि० क०-सं०-भाषा अकादमी)
3. महाकवि श्री बाणभट्ट पुरस्कार-(उत्तर प्रदेश संस्कृत अकादमी)
4. 1994, राष्ट्रिय एकता पुरस्कार-(अ०भा०रा० एकता सम्मेलन)
5. विशिष्ट विद्वान् पुरस्कार-(उत्तर प्रदेश संस्कृत संस्थान)
6. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :—राष्ट्रिय पाठ्य पुस्तक बोर्ड-(भारत सरकार)
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी
हि० कला-संस्कृति एवं भाषा अकादमी
} निवृत्त

प्रियवर्य गुरुभ्रातरः डॉ० सत्यव्रतशास्त्रिणः,

नमस्कृतयः।

स्मरामि गुरुवर्यान्मे श्री चारुदत्तशास्त्रिणः।
केवलं हृदयाम्भोजे वाग्देवी समुपासिता ॥१॥
"संस्कृतकाव्यकुञ्जम्" भवद्भ्यः प्रेष्यते मया।
अवलोक्य लिखन्तु मे भवतां मतमुत्तमम् ॥२॥
सप्ततिः साम्प्रतं वर्षाण्यशीतिवर्षीयसम्मितः।
न जानामि कदा लोकात् प्रयाणं सम्भविष्यति ॥३॥
फलिता विदुषां सर्वा जीवने शुभकामना:।
तत्रापि भवतां नाम सर्वोपरि विराजते ॥४॥
उत्तरस्य प्रतीक्षायां स्थास्यामि सदनेऽनिशम्।
आयास्यति ध्रुवं पत्रं भवतां मङ्गलप्रदम् ॥५॥

सस्नेहम्,

भवदीयः- दुर्गादत्तः शास्त्री

डा० श्री सत्यव्रत शास्त्री जी,
पूर्वकुलपति श्रीजगन्नाथ संस्कृत विश्वविद्यालय पुरी
3/54 रूपनगर दिल्ली

संलग्नम्- "संस्कृतकाव्यकुञ्जम्"

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नलेटी
द्वारा-नैहरनपुखर
तहसील-देहरा
जिला-कांगड़ा
(हिमाचल प्रदेश)
पिन 177104
फोन :-01970/45094
दिनाङ्क 22.12.98

प्राप्तिकर्त्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-(हि०क०-सं०-भाषा अकादमी)
3. महाकवि श्री वाणभट्ट पुरस्कार-(उत्तर प्रदेश संस्कृत अकादमी)
4. 1994, राष्ट्रिय एकता पुरस्कार-(अ०भा०रा० एकता सम्मेलन)
5. विशिष्ट विद्वान् पुरस्कार-(उत्तर प्रदेश संस्कृत संस्थान)
6. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :—राष्ट्रिय पाठ्य पुस्तक बोर्ड-(भारत सरकार)
यूनीवर्सिटी कोर्ट हि० प्र देश यूनीवर्सिटी
हि० कला-संस्कृति एवं भाषा अकादमी
] निवृत्त

डॉ० श्री सत्यव्रत शास्त्रिणः
3/54 रूपनगर
दिल्ली

नवर्षं मङ्गलाकाङ्क्षी :

गतिं स्वकीयां निधनां दधानो
वर्षो नवीनः समुपागतोऽयम् ।
तनोतु भद्रं भवतां गृहस्थे
मनोरथाः सन्तु सदा फलाढ्याः ॥

मङ्गलाकाङ्क्षी -
दुर्गादत्तः शास्त्री

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवामें

डॉ. सत्यव्रत शास्त्रीजी

3/54 रूपनगर

दिल्ली 110007

First Fold →

Third Fold →

SENDER'S NAME & ADDRESS.

डॉ सत्य व्रत शास्त्री, विद्यावाचस्पति
राष्ट्रीय पुरस्कार प्राप्त
चीफ डाकघर क्लर्क
पो० ऑफिस मोतीनगर (नई दिल्ली) पि० को०

NO ENCLOSURES ALLOWED

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

पुरी.
10-11-94

परमपूजनीयाः! शास्त्रिपादाः!

नमामि हे ज्ञाननिधे! पदाब्जे तवामले पूततमे निकामम्
आश्रित्य निर्भीकतया विभान्ति परःसहस्रं विबुधाश्च यत्र। (१)

अवाप्य हे पूज्य! भवद्करांकितं
इसान्वितं लेखमहं चिरात् परम्।
प्रमोद-कोटिं सहसैव लब्धवान्—
नमीषु-लाभे सुखितो भवेन्नकः। (२)

"दलं" शब्दः पत्रार्थकोऽभियुक्तैर्[I] बहु युज्यते,
इत्याशयो भवतां य स्तत्र मे संशयो महान्। (३)
हैमामर-धरण्यादि-कोषेषु वृक्षपत्रार्थे
"दल" शब्दः प्रयुक्तोऽस्ति, नतु लेखेऽर्थे दृश्यते। (४)

तथाप्यत्र भवादृशा विद्वांसो यत् प्रभाषन्ते
स्वीकार्यं तदेवास्माभि र्विबुधान् को न मानयेत्। (५)

नानोचितं राजति तत्र पूज्या! भागान्तरं यत् भवदीयकाव्ये
विभिन्नकार्ये व्ययितक्षणोऽहं क्रमानुसारं परिशीलयामि। (६)

इति विनीतः
सूर्यमणिः
पुरी

I- लेखोऽर्थः (for Letter)

To
Prof Dr Satyavrat Shastri
3-S-4 Roop Nagar
Delhi

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

DEPARTMENT OF SANSKRIT
UNIVERSITY OF CALCUTTA
CALCUTTA-700073

Dr. Sitanath Acharya Sastri, *M A., Ph.D.*
Kavya-vyakarana-nyaya-tarkatirtha, vidyatirtha.
Head of the Department

Residence
RABINDRA PALLI
AF 177
P.O. PRAFULLA KANAN
CALCUTTA - 59
PIN - 743511

Ref : .....

Date : शुभविजयातिथिः, १४०१

विश्वविश्रुतकीर्तिभाजां
परमाराध्यचरणानां
श्रीयुत सत्यव्रतशास्त्रिमहाभागानां
पादपद्मेषु विजयाप्रणतिः

श्रीशारदीयविजया तिथिरेव धन्या
सर्वैः सुमान्यविबुधैर्जननीव मान्या।
दुर्गाप्रसादसफलीकृतजन्मलग्ना
वर्षान्तरे पुनरहो सुखमागतेयम्॥

मोदेदं भुवनं विभात्यभिनवं दिव्यप्रमोदभासितं
वस्त्रान्नादिगता गतेव नियता या भावना पार्थिवी।
सर्वे जीवगणा हसन्ति सदृशा लीनो विभेदोऽधुना
दूरादेत्य मिथो मिलन्ति मनुजाः प्रेमद्रवन्मानसाः॥

अस्मिन पुण्यतमे क्षणे शरणमये नित्यप्रमोदावहे
श्रद्धाचन्दनचर्चितः सुरभितो भक्त्याचचिन्तोत्थया।
आचार्य्यैः सुरभारतीप्रणयिनो ज्ञानप्रदीप्ता भवत्
पादाब्जे ~~ष~~ अभिवादनाञ्जलिरयं संगृह्यतां मामकः॥

प्रणामनम्रः

श्रीसीतानाथदेवशर्मा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Ch. & Ra.

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नलेटी
द्वारा—नैहरनपुखर
तहसील-देहरा
जिला-कांगड़ा
(हिमाचल प्रदेश)
पिन 177104

दिनाङ्क: 6-9-96

प्राप्तिकर्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-(हि०क०-सं०-भाषा अकादमी)
3. महाकवि श्री वाणभट्ट पुरस्कार-(उत्तर प्रदेश संस्कृत अकादमी)
4. 1994, राष्ट्रिय एकता पुरस्कार-(अ०भा०रा० एकता सम्मेलन)
5. विशिष्ट विद्वान् पुरस्कार-(उत्तर प्रदेश संस्कृत संस्थान)
6. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :—राष्ट्रिय पाठ्य पुस्तक बोर्ड-(भारत सरकार)
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी
हि०कला-संस्कृति एवं भाषा अकादमी
} निवृत्त

प्रिय भ्रातः डॉ. सत्यव्रत शास्त्रिणः,

सस्नेहं प्रणामः।

चिरान्न लिखितं पत्रं भवद्भिस्तु मनस्विनः।
अस्मिन्नवसरे तेनुस्त्रिचत्वारिंशद्वर्षाणि यावते ऽनिशम् ॥१॥
आसीदेकं कुलं नवं सजेत भवतां गृहे।
श्रीमतां पाञ्चमः पुत्रो देवव्रत्या विशेषिणः ॥२॥
स्मरामि जन्मघट्टिके प्रातः सायं दिनं दिनम्।
आशिषः देवलं तेषां लेखनीं प्रेरयन्ति मे ॥३॥
संस्कृताकादमी दिल्ल्यां देवभाषाप्रचारिणी।
संस्कृतदिवसस्येयं कल्पेत्यामोजनं सदा ॥४॥
अपरह्णान्निमन्त्रिताः आमन्त्रयते सुतं मया।
भवति चेदिदं सत्यं संयोगं साधयन्तु मे ॥५॥
सतीर्थ्यं मिलेत्सौख्यं याक्षन्तोरो भविष्यति।
दूरध्वनिद्वयोक्तं तत् दिल्लीपुर्यां निवासिनाम् ॥६॥
उत्तरन्तु प्रतीक्षिष्ये शुभाकुलस्तु मे गृहे।
शासते भवतां पत्रं "निधिः मधित्समागतः" ॥७॥

आदरं अभिवादनं च डॉ. सत्यव्रत शास्त्रिणे दुर्गादत्तः

3/24 रूपनगर, दिल्ली

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नलेटी
द्वारा—नैहरनपुखर
तहसील देहरा, जिला कांगड़ा
(हिमाचल प्रदेश)
पिन 177104

दिनाङ्क 1-11-94

प्राप्तिकर्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-
   हि०क०-सं०-भाषा अकादमी
3. महाकवि श्री वाणभट्ट पुरस्कार-
   उत्तर प्रदेश संस्कृत अकादमी
4. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :— राष्ट्रिय पाठ्य पुस्तक बोर्ड .....
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी } निवृत्त
हि०कला-संस्कृति एवं भाषा अकादमी

प्रिय डॉ० सत्यव्रत शास्त्रिणः,

दीपावल्याः परमसुखदं वासरं स्याद् भवद्भ्यो
लक्ष्मीरायद्दिनमनुदिनं मङ्गलार्घैश्चयः स्यात् ।
एतज्ज्योतिर्जलतु भवतामाश्रमे ऽनन्तकालं
गेहे स्नेहो जलधिजलवद्वर्धतां नित्यमेव ॥
परिवारस्य सर्वस्य भवतु मङ्गलं सदा ।
दीपावली समायातु प्रतिवर्षं सुखान्विता ॥

शुभचिन्तकः — दुर्गादत्तः

डॉ० सत्यव्रत शास्त्रीजी
पूर्वकुलपति संस्कृत विश्वविद्यालय पुरी
3/54 रूपनगर दिल्ली

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड

INLAND LETTER CARD

सेवा में

डॉ० सत्यव्रत शास्त्रीजी
3/54 रूपनगर
नई दिल्ली – 7

SENDER'S NAME & ADDRESS

श्री अज शास्त्री, विजयनगर
राष्ट्रीय पुरस्कार प्राप्त
मॉडल डाकघर नलेटी
पो० देहरा गोपीपुर (...) हि० प्र०

NO ENCL...

TAJ MAHAL 506

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

सत्यमित्र शास्त्री
31.12.97
बी. २६, आनन्द नगर (जेल रोड) रायबरेली

काहविभवविवर्द्धं
औरव्य सोमाग्य वर्षम्,
धम-नियम-निधिष्ठं
देहदीप्ति प्रकर्षम् ।
अभिमत हित सिद्धिं
सर्वथा वः सहर्षम्
अविरत मिह देयाद्
भूरिशो नव्यवर्षम् ॥

Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan

सेवामें,—

डॉ० सत्यव्रत शास्त्री

३।१५५ रूप नगर

दिल्ली—७

पोस्ट कार्ड POST CARD

पिन PIN 1 1 0 0 0 7

DELHI-७

110007

Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan

CSP

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नलेटी
द्वारा-नैहरनपुखर
तहसील-देहरा
जिला-कांगड़ा
(हिमाचल प्रदेश)
पिन 177104
फोन :-01970/45094
दिनाङ्क..9-2-98.

प्राप्तिकर्त्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-(हि०क०-सं०-भाषा अकादमी)
3. महाकवि श्री वाणभट्ट पुरस्कार-(उत्तर प्रदेश संस्कृत अकादमी)
4. 1994, राष्ट्रिय एकता पुरस्कार-(अ०भा०रा० एकता सम्मेलन)
5. विशिष्ट विद्वान् पुरस्कार-(उत्तर प्रदेश संस्कृत संस्थान)
6. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :—राष्ट्रिय पाठ्य पुस्तक बोर्ड-(भारत सरकार)
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी
हि० कला-संस्कृति एवं भाषा अकादमी
] निवृत्त

प्रिय डॉ० सत्यव्रत भ्रातरः,

सस्नेहं नमामि।

प्रगन्तु भवतां प्राप्तं परमानन्ददायकम्।
परन्तु मम काव्यस्य विषये नात्र वर्णनम् ॥१॥
सैप्टम्बरार्धे एवेत्र पुस्तकं प्रेषितं मया।
"संस्कृतकाव्यकुसुन्तु" पार्सलाभ्यन्तरे कृतम् ॥२॥
चिरादहं प्रतीक्षायां स्थितिष्ठेऽत्र दिनं दिनम्।
भ्रातरो मे वदिष्यन्ति किञ्चित्तत्र शुभाशुभम् ॥३॥
नावार्ता चेद् मयाप्तास्तद् विस्मयो जायते महान्।
संसूचयन्तु मां शीघ्रं प्रेषयाम्यपरं द्रुतम् ॥४॥

सादरम्,

भवदीयः — दुर्गादत्तः शास्त्री

डॉ० सत्यव्रत शास्त्रीजी
पूर्वकुलपति — श्रीजगन्नाथ संस्कृत विश्वविद्यालय
पुरी

CC-O/Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

First Fold →

प्रेषक की

डॉ० सत्यव्रत शास्त्री
3/54 मुखर्जी नगर
दिल्ली - 110007

भारत INDIA

100

Third Fold →

SENDER'S NAME & ADDRESS.

NO ENCLOSURES ALLOWED

Second Fold →

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्री.

जयपुर
26/10/2000

फ्र दीपावली- शुभाशंसनम् फ्र

"सुखायाऽस्तु दिताायाऽस्तु
ऋद्धये सिद्धये तथा
प्रेयसे श्रेयसे चाऽस्तु
दीपलक्ष्मीः सदैव वः ॥"

शुभम्-

डा० प्रभाकर शास्त्री

शास्त्री सदन
254, खूटा मोड़
जयपुर-१ (302001)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवा में

डॉ० सत्यव्रत शास्त्रीजी
3/54 रूपनगर
दिल्ली - 110007

First Fold →

Second Fold →

Third Fold →

SENDER'S NAME & ADDRESS.

NO ENCLOSURES ALLOWED

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्री.

जयपुर
26/10.2000

फू दीपावली- शुभकामनाएँ फू

"सुखायाऽस्तु दिताथाऽस्तु
ऋद्धये सिद्धये तथा।
प्रेयसे श्रेयसे चाऽस्तु
दीपलक्ष्मीः सदैव वः॥"

शुभम्-

डा० प्रभाकर शास्त्री

शास्त्री सदन
254 नन्दा मार्ग
जयपुर-१ (302001)

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ नव खीष्टयब्दीये (२०००) शुभ कामना ॥

कालः कल्पान्तकारी कलयति जगती जीवनत्यायुरेतत्
वर्षं तस्यैकखण्डं भवति सुविदितं कर्मभिस्त्वेन भूमेः
दुर्वृत्तैरुग्रकर्मि प्रशमनकरणे सौनत्यप्रसारं ।
आतङ्कात् त्राणदाने कक्यहरमिदं नूतनं वत्सरं स्यात् ॥

आचार्य [illegible] शास्त्री कुल
राष्ट्रपति पुरस्कार सम्मानित
[illegible] पटना सिटी-8

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

युगाब्दः-5101 ॥श्रीः॥ "श्रीविद्या"
उपविद्यापीठ
दीपावली शुभाशीर्वचनम् राणा प्रतापनगर
नागपूर-440022

हितायाऽस्तु सुखायाऽस्तु
यशसे सिद्धये तथा।
प्रेयसे श्रेयसे चाऽस्तु
दीपलक्ष्मीः सदा तव॥
क्षपयन्ती तमःस्तोमं तेजःस्तोमं वितन्वती॥
विद्रवन्ती चिदानन्दं दीपलक्ष्मीः प्रसीदतु॥

"प्रज्ञाभारती"

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

नारु रोग उन्मूलन
में सहयोग दें,
नारु रोगी बताएं,
इनाम पाएं।

पोस्ट कार्ड POST CARD

डॉ-सत्यव्रत शास्त्री
3/54 रूपनगर
नई दिल्ली-7

पिन PIN 1 1 0 0 0 7

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Telephone: 2024[illegible]

ॐ विघ्नानां दुःखनाशं ये कुर्वन्ति नित्यमङ्गलम् ।
तौ भुवनेश्वरौ वन्दे देवान् देवीश्च सादरम् ॥

अयि पूज्य ॐ वर्णानामर्थसंघानां रसानां छन्दसामपि
मङ्गलानां च कर्तारौ वन्दे वाणी-विनायकौ ॥

सम्बलपुरम्, उत्कलम्
प्रफेसर कलोनि.

अयि पूज्याः सदाशयाः !

भक्तिपूर्णं प्रणामं मे स्वीकुर्वन्तु महाशयाः ।
निवेदयन्तु मात्रे च कृपया विघ्न-वन्दिताः ॥ १ ॥

आनन्दिकं सदा भव्य- माशीर्वादं शुभावहम् ।
संसूचयन्तु कृपया परिवारे विराजितान् ॥ २ ॥

पूर्व-वर्षद्वये विघ्न-वन्दितानां कृते खलु ।
संप्रेषितं विलम्बेन सत्वरं च तथा मया ॥ ३ ॥

भवदीयं कृपापत्रं पूर्वं चाधिगतं मया ।
आसीन् मे सुदृढो भव्यो विश्वासो मानसे तदा ॥ ४ ॥

पुरस्कारं च प्राप्स्यामि महनीयं त्वनुग्रहात् ।
राष्ट्रस्य माननीयानां पतीनां सर्वथा खलु ॥ ५ ॥

नाधिगतः पुरस्कारो भवत्प्रस्तावनादपि ।
सन्देहो मे महान् सत्यं न जाने कारणं पुनः ॥ ६ ॥

सत्यं मे योग्यता नास्ति पुरस्काराधिमेव वै ।
परं सा मे दृढं जाता भवत्-संसूचनेन हि ॥ ७ ॥

काचः काञ्चन-संसर्गाद् धत्ते मारकतीं द्युतिम् ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ८ ॥

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।
स्मृत्वा त्वां सुसकरीं कीर्तिवन्द्य-सूक्तिं
संप्रेषयामि भवतां पुनरन्तिकं वै ॥ ९ ॥

प्रेरणयैव पज्यानां प्राच्यविद्या-सुमेलने ।
पण्डितानां संभायां वै योगदानं कृतं मया ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

नारु रोग उन्मूलन
में सहयोग दें,
नारु रोगी बताएं,
इनाम पाएं।

25 भारत INDIA

NAGPUR RMS

पोस्ट कार्ड POST CARD

डॉ-सत्यव्रत शास्त्री
3/54 रूपनगर
नई दिल्ली-7

पिन PIN 1 1 0 0 0 7

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ विघ्नानां दुःखनाशं ये कुर्वन्ति नित्यमङ्गलम् ।
तौ भुवनेश्वरौ वन्दे देवान् देवीश्च सादरम् ॥

ॐ वर्णानामर्थसंघानां रसानां छन्दसामपि
अस्ति पूर्ण मङ्गलानां च कर्तारौ वन्दे वाणी-विनायकौ ॥

सम्बलपुरम्, उत्कलः
प्रफेसर कलौनि.

अयि पूज्याः सदाशयाः !

भक्तिपूर्णं प्रणामं मे स्वीकुर्वन्तु महाशयाः ।
निवेदयन्तु मातरे च कृपया विश्व-वन्दिताः ॥ १ ॥

आन्तरिकं सदा भव्य- माशीर्वादं शुभावहम् ।
संसूचयन्तु कृपया परिवारे विराजिताः ॥ २ ॥

पूर्व-वर्षद्वये विघ्न-वन्दितानां कृते खलु ।
संप्रेषितं विलम्बेन सत्वरं च तथा मया ॥ ३ ॥

भवदीयं कृपापत्रं पूर्वं चाधिगतं मया ।
आसीन् मे सुहृदो भव्यो विश्वासो मानसे तदा ॥ ४ ॥

पुरस्कारं च प्राप्स्यामि महनीयं त्वनुग्रहात् ।
राष्ट्रस्य माननीयानां पतीनां सवितः खलु ॥ ५ ॥

नाधिगतः पुरस्कारो भवत्प्रस्तावनादपि ।
सन्देहो मे महान् सत्यं न जाने कारणं पुनः ॥ ६ ॥

सत्यं मे योग्यता नास्ति पुरस्कारार्थमेव वै ।
परं सा मे दृढं जाता भवत्-संसूचनेन हि ॥ ७ ॥

काचः काञ्चन-संसर्गाद् धत्ते मारकतीं द्युतिम् ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ८ ॥

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।
स्मृत्वा त्वां सुसकरीं कविवन्द्य-सूक्तिं
संप्रेषयामि भवतां पुनरन्तिकं वै ॥ ९ ॥

प्रेरणयैव पूज्यानां प्राच्यविद्या-सुमेलने ।
पत्रिकायां संस्मरणं वै शोधपरं कृतं मया ॥ १० ॥

CC0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ विघ्नानां दुःखनाशं ये कुर्वन्ति नित्य मङ्गलम्,
तौ भुवनेश्वरौ वन्दे देवान् देवीम् साश्रम्"

ॐ वर्णानामर्थसंघानां रसानां छन्दसामपि,
मङ्गलानां च कर्तारौ वन्दे वाणी-विनायकौ"

सिध्यन्ति कार्येषु महत्स्वपि यन्नियोज्याः,
संभावना-गुणमवेहि तमीश्वराणाम्,
किंवा भविष्यदरुण-स्तमसां विभेत्ता,
तं चेत् सहस्र-किरणो धुरि नाकरिष्यत"
— शाकुन्तले - ७.

दृष्यन्तं-वचनं चेदं स्मारयामि पुनः पुनः,
प्राप्स्यामि तु पुरस्कारं भवदनुग्रहेण वै"

संसूचनेन पूज्यानां समये प्रेषणेन वै,
प्राप्स्यामयेव पुरस्कारं विश्वासो मे दृढोऽस्ति हि"

कुशलं सूचयित्वैव पत्रस्य प्रेषणेन वै,
अनुग्रहं करिष्यन्ति कृपया विश्व-वन्दिताः"

श्रीजगन्नाथ-देवस्य पुण्यक्षेत्रे निवासिनाम्,
संप्रत्यपि स्मरामयेव पूर्वप्राप्तां सुसङ्गतिम्"

श्रीजगन्नाथ-देवस्य (संस्कृत)-विश्वविद्यालये खलु,
पूर्व-कुलपतीनां वै (भवतां) शरण्यः श्रीसदाशिवः"

सूचना- बाढ्यानीरै तु संजाते विश्व-संस्कृत-मेलने,
पठितौ प्रेषयामयेव प्रबन्धौ भवतां कृते"
नवीनं भवनं चात्र देवीक्षेत्रे सुनिर्मितम्,
परमासे गमिष्यामो दीयते सूचना त्वयः"

इकुर सदाशिव महाराजः
पूर्व संस्कृताध्यापकः
स्थान — देहरापालिः
पत्रालयः (P.O) - कुंदारजा, समबलपुरम्, ओड़िशा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ विघ्नानां दुःसनाशं ये कुर्वन्ति नित्यमङ्गलम्,
तौ भुवनेश्वरौ वन्दे देवान् देवीश्च सादरम्"

वर्णानामर्थसंघानां रसानां छन्दसामपि।
मङ्गलानां च कर्त्रीशौ वन्दे वाणी-विनायकौ॥

8. 12. 2000
देहरिपाटनः
सम्बलपुरम्

श्रीयुत महानुभावाः,

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यमृत-सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥
- श्रीमद्भागवते, १०.२.२६.

भक्तिपूर्णं प्रणामं मे स्वीकुर्वन्तु महाशयाः।
निवेदयन्तु मात्रे च कृपया विश्वविश्रुताः॥

परिवारे च ये सन्ति पुत्रपौत्रादयः किल,
आशीर्वादं सदा भव्यं कृपया सूचयन्तु तान्॥

भवदीयं कृपापत्रं (22.3.2000) संप्राप्तं समयेन वै।
बलेन यस्य समान-प्राप्ते में निश्चिता मतिः॥

नवगृह-प्रवेशार्थं भृशं कर्मीव व्यापृतः,
पुनर्वैशाख-कार्येण श्रीभुवनेश्वरं गतः॥

इच्छतापि मया तस्मात् प्रेषणीयापि सर्वथा,
कृतज्ञता दृढौ नैव तत्कालं विधिवेदिता॥

श्रीभुवनेश्वरादेव स्वगृहं ह्यः समागतः,
निवेदयामि चाद्यैव हृदयस्य कृतज्ञताम्॥

क्षमाशीलाः सदा सन्तः परोपकार-तत्पराः,
अतएव चाग्रजैस्तु क्षमणीयोऽनुजो मुदा॥ (मुदा)

शिक्ष्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावना-गुण-मवेहि तमीश्वराणाम्,
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो पुरि नाकरिष्यत्॥ - शाकुन्तले मातलिं प्रति दुष्यन्तः,

दुःखवार्ता:- आचार्यो लङ्केश्वरः
बहुपूर्वं दिवं यात आचार्यो लङ्केश्वरः,
भगवत्-प्रियार्थं च साहित्यस्य दिवं गतः॥
आचार्यः कुम्भचन्द्रस्तु गते मासे दिवं श्रितः,
उत्कल-संस्कृताकाशे अवतां बहुविश्रुताः॥

श्रीजगन्नाथदेवस्य (पुरी) निवासिनश्च पुरः,
पूर्वकुलपतीनां वै श्रद्धेयः श्रीसदाशिवः॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

विद्या – वैभव – भवन
सूबेरुक.र्ण - मार्ग, राममन्ज
जयपुर–302003 (राज.)

विजयदशमी, वि.सं.२०५८

श्रीरामचन्द्रं नौमि, दशरथ-तनयं जनकात्मजा-वरम् ।
स्व-शरणागत-रक्षकं, रघुकुल-तिलकं सुख-शान्ति-दम् ॥१॥

मा-शारदायाः प्रिय-पुत्रकेभ्यः, सद्भक्तकेभ्यः शुचि-मानसेभ्यः ।
नमो भवद्भ्यः सकुटुम्बकेभ्यः, सत्यव्रतेभ्यः सुधियं वरेभ्यः ॥२॥
विजय-दशम्या सार्धं, दीपावलि-पर्व समागतेभ्यः ।
तत्र भवद्भ्यो भवद्भ्य, आर्या ! अभीष्टदो कोभोतु ॥३॥

स्नेहो-निकटुं मधुरं मनोज्ञं, सानुग्रहं स्नेह-परिप्लुतं च ।
श्रेमत्क-पत्रं समवाप्य मन्याः ! मनोमयूरो मम मोमुदीति ॥४॥

धन्योऽस्म्यहं यस्य सुवर्ण-हारो, भातो भवद्भ्यः कवि-पुङ्गवेभ्यः ।
कार्त्तिक्य मस्मै च सदा वहामि, विजोत-नो[illegible]क्कोऽहम् ॥५॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

सेवामें-

श्रीयुक्त परमादरणीय
पद्मश्री-विभूषित, म. म. राष्ट्रपति-सम्मानित
डॉ० सत्यव्रत जी शास्त्री
शचस्पति
महामहोपाध्याय
3/54, रूप नगर
दिल्ली.

पी.आर.यू./I.S.P.-200 पोस्ट कार्ड POST CARD

पिन PIN 1 1 0 0 0 7

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Ch. S. Rao
C/o Sri Ch. Ramnath
Telephone: 2024136

1-B Madhuban,
Gen J Bhosale Marg.
Mumbai-21
PIN 400021

PAGE NO.:
DATE: / /

13.1.2002

आर्य महाशय,

नूतनसंवत्सरारंभसंदर्भे मया प्रेषितलेखायाः भवत्प्रत्युत्तरं द्वितीयदिनपूर्वमेव मम हस्तगतमासीत्, महानमानंदं च प्राकल्पयत्। अथ,

वयोवृद्धो भवानस्ति तथावृद्धोऽहमप्यिच।
ततः किं? पाटवं सत्याः भवेत्प्रभुदयागुणात्॥ 1
जरठत्वं च रुग्णत्वं नरभारकरेऽप्युभे।
निलीयमानसाराऽपि वरारोग्यवती जया॥ 2
द्विष्ट्या प्रवृत्तिः शक्तेरिहेदृक्ष्यसादृशं किल।
तत्प्रेरिता स्तदेवाऽयं दुर्दुः कर्मोपिनं च नः॥ 3
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे।
काव्यामृतरसास्वादः सत्संगः सज्जनैः सह॥ 4
सा लोकस्यसिद्धिः संपाद्या द्वयेनानेन, नान्यथा।
स्वाध्याय इति या पूर्वं पद्धतिः भवता स्मृता॥ 5
सा पद्धतिः प्रकृष्टा स्यात् द्वयेनानेन नित्यशः।
इति मन्ये, रोचते मे कालक्षेपस्तदाश्रितः॥ 6

वामलूरतनयामृतं गिरं
कालिदासकविताससौरभम्।
श्रीहर्षमृदुतरार्द्रतादृढं
काव्यशोरणिकलाधिलेकिनीम्।
योननादिविदुषां सभासदं-
पादिताम्रप्रोज्वलांघ्रिवा-।
गैभवं समभिकांक्षभावभृत्
संस्मरामि सप्रश्रयं सदा॥ 8

इत्थं द्रांजलिसंप्राप्तगीतालीनः प्रकल्पितम्।
गीर्गणभाषाविन्यासन्संपन्नो रुचिरं मुदा॥
मज्जिह्वाग्रतो वेद्यां भारतीमिन्दुशीतलाम्।
गानामृताभिधानां कन्यारत्नं संभावयाम्यहम्॥ 10

(P.T.O.)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

कैमर्थं शंकराचार्यवाणी परशिवात्मिका।
मत्प्राप्तुचात् ज्ञानरथारूढा मत्स्युपट्टिका ॥ ॥

नंदुनंदनसौंदर्यमंदिराननविस्सृता।
व्यासवाग्वासस्क पुना गीतार्चिद्वाहिनी ॥
मद्धव पावनी कुर्यान्मेऽनिशं मङ्गलं भृशम्।
इति चिन्तयतस्क पुस्तकैरन्यैरलमन्न मे ॥ 13
धीराद्धिवद्धिच्छामि प्राप्तुं ~~प्रतिनिधानतस्क~~
पदभ्रंशो नान्यत्रोपदेशो योऽन्न ~~कुत्रापि~~ सहेनतम। 14
~~अत्र~~ परमपदांभवानिति कर्तृशब्दस्क ग्रहणीयस्क भवति।
अद्य सूर्यो भगवान् मकरराशिसंक्रांतिं करोति। अद्य पुनराचरण-
पुण्यवेलायां 'आरोग्यं भास्कराद्धिच्छेत्' इति, 'नमस्कार-
प्रियस्क सूर्यस्क' इति च वाक्ये संस्मृत्य ~~अ~~ भगवंतं वयं
सर्वे प्रपद्यामहे।

बहु लिखितं सांप्रतं मयेति वेद्मि। एवं
भवद्विधेयस्क
चिंतगुंटसूर्यनारायणस्क

*अंध्रिकायस्क नागविद्येति। तिभाषाप्राज्ञैक विद्वांभूषाधिमानसस्क।
विज्ञाभिज्ञानाभिक्षाय केनचिद्विमत्करस्क ॥
चिंतगुंट सूर्यनारायणस्क
Ch. S. Rao.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Ch.S Rao

1- B Madhuban
Gen J Bhosale Marg.
Mumbai - 400021
16/11/01

हाऽच,

मामकनमाँस्येनकानि।
पावनिरुआकाँक्षासहितं मत्प्रहितं हितं।
स्वान् गृह्णानिदं पत्रं कांतं विनतिकांक्षितम्॥ 1

दुःसकलसंपदुमपारकरुणापगावक्रभः
कटुंबनरुमूलसंक्रीनःक्षितसगोपगोपीजनः।
मदुसदुडदारगोजणाट्टिपटुः सर्वेशीकरः
सदुडवनु हरिः सनस्सुधांशुकदुनोयशोदासतः॥ 2

श्यामाऽयनधवनः सत्य-भामामणि धवो, धवः।
माया, मायाविहारज्ञः पान्तुनो नरकांतकः॥ 3

चैद्यध्वंसी वासुदेवो युधिष्ठिरसमर्हितां-।
प्रिद्वयो नृहरिः कृष्णः नतमोघ्नो द्युतिमन्नमः॥ 4

नमोवाकं ब्रूमो नयनरमणीयाननवते
नमस्कारं कुर्मो भयनिकरविद्रावणकृते।
हरे त्वत्पादाब्जप्रकटयुगकायाऽद्भुतयशो-
विशाकायस्यैसंनतिविनिमयोसाहसभृते॥ 5

-इति प्रार्थनोपेतं वचः-

एवम्
बुधजनविधेयः
Ch.S Rao

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

केनचिं शंकराचार्यवाणी परशिवात्मिका।
मत्प्राप्तुचात् ज्ञानरथारूढा मत्स्युपदेशिका ॥ 11

नंदुनंदनसौंदर्यमंदिराननविस्सृता।
व्यासनाऽवासस्थ पूता गीताचिद्वाहिनी ॥
मद्धृदय पावनी कुर्यांमेऽनिशं मद्गुरुं भृशम्।
इति चिन्तयतः पुस्तकेऽन्यैरलमन्त्र मे ॥ 13
दुरादुधिवदुच्छामि प्राप्तुं ~~प्रणम्य~~ निधानतः।
पदभ्रंशो नान्यत्रोपदेशो योऽत्र ~~दुर्लभ~~ सैहनतम्। 13अ
~~अत्र~~ परमपदुंथां भवानिति कर्तृशब्दः ग्रहणीयः भवति।
अद्य सूर्यभगवान मकरराशिसंक्रांतिं करोति। अद्य पुनराचरण-
पुण्यवेलायां 'आरोग्यं भास्कराद्विच्छेत्' इति, 'नमस्कार-
प्रियः सूर्यः' इतिच वाक्ये संस्मृत्य ~~अत्र~~ भगवंतं नंवयं
सर्वे प्रपद्यामहे।

बहु लिखितं सांप्रतं मयेति वेद्मि। एवं
भवद्विधेयः
चिंतगुंटसूर्यनारायणः

*अंबिकायाः नाथविद्येति।

तिमावाप्रातर्वैक विद्वांभूजाधिमानसः।
विज्ञाभिज्ञानाभिक्षाया केनचिन्नमिलकरः॥
चिंतगुंट सूर्यनारायणः
Ch. S. Rao.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Ch. S Rao

1- B Madhuban
Gen J Bhosale Marg.
Mumbai - 400021
16/11/01

महाशय,

मामकजनमांस्यनेकानि।

दीपावलिशुभाकांक्षासहितं मत्प्रहितं हितं।
श्रवान् गृह्णानिदं पत्रं कांतं विनतिकांक्षितम्॥ 1

दुदुः सकलसंपदुमपारकरुणापगावल्लभः
कंदुलतरुमूलसंक्रीनः क्षीतसगोपगोपीजनः।
मुदुसदुडुदारगोगणाद्दृतिपटुः सर्वंसी करः
सदुपवनु हरिः सनस्सुधांशुवदुनोयशोदासुतः॥ 2

श्यामाऽयनधवः सत्य-भामामणि धवो, धवः।
माया, मायाविहारज्ञः पातुनो नरकांतकः॥ 3

चैद्यध्वंसी वासुदेवो युधिष्ठिरसमर्हितां-।
प्रीद्वयो नृहरिः कृष्णः नतमोघ्नो द्युनिमन्नगः॥ 4

नमोवाकं ब्रूमो नयनरमणीयाननवते
नमस्कारं कुर्मो भयनिकरविद्रावणकृते।
हरे त्वत्पादाब्जप्रकटयुगकायाद्भुतयशो-
विशाकायस्यैवं नतिविनिमयोत्साहसभृते॥ 5

- इति प्रार्थनोपेतं वचः -

एवम्
बुधजनविधेयः
Ch. S Rao

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

यहाँ काट कर खोलिए TO OPEN CUT HERE

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

Prof Satyavrat Shastri
Prof. of Sanskrit (Retd), University of Delhi
C 248, Defence Colony
New Delhi पिन PIN 1 1 0 0 2 4

दूसरा मोड़ SECOND FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURE ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :– SENDER'S NAME AND ADDRESS :–

Ch. S Rao
1-B Madhuban
Gen J Bhosle Road, Mumbai.

पिन PIN 4 0 0 0 2 1

पहला मोड़ FIRST FOLD CSP

यहाँ काट कर खोलिए TO OPEN CUT HERE

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

आर्य महोदय,

1-B, Madhuban,
Lyu. J Bhosale Marg.
Mumbai-PIN 400026.

इतः पूर्वं प्रेषितं मम देवपत्रं भवद्हस्तमुपगतोऽहमिति 12/3/02.
मन्ये। तयोः द्वितीयं भवतः काव्यपुरस्कारविषयकं
हर्षप्रदमासीत्। आंग्लभाषिकं च।

अद्य महाशिवरात्रिपर्वदिने रामकीर्तिं पठनं च
आमूलाग्रपरिशोधनसमर्पणमेकवादं कृत्वा परमात्मोदुमहमासम्
पुनः पुनरास्वादार्हमस्ति काव्यवस्त्विति असंशयम्।

वाल्मीकिगिरिसंभूता रामाम्भोधिमहानगा।
श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम्॥ 1

किंतु वाल्मीकिना प्रोक्तं सीतायाश्चरितं महत्-।
द्विति रामायणकथा मधिकृत्य, न वा भवेत्॥ 2

किमनर्थं वाऽपि नर्थं किमित्यस्मिन् तु संशयः।
स विद्वांसावशिष्टः स्याद्रामकथासूने-॥ 3

ईने यस्यां सती सीता धृष्टतासहिता स्थिता॥
सद्वंशिवरस्य निर्धारिश्चाहतस्तृप्तया तया॥ 4

कल्याणकृद्दुष्टः स भवत्काव्यांतर्हितस्थितः।
सीताकल्याणकक्षोभं दृष्ट्वा लोकाय निस्तुलम्॥ 5

इति शम्।

भवद्धोमकथातत्परः
चिन्तकुण्ट सूर्यनारायण (सूरिः)

Ps.

यतः 'सूरि' संबोधनं मम कृते रूढमस्ति।
सोऽहं तथा सर्वजनप्रेमपात्रं नामाऽभवन्नृणाम्॥
न देवाद्य प्रगृह्णामि मुद्रांऽयं प्रथमोवसरः॥

CRSRao

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

Mahamahopadhyaya
Dr. Prof Satya Vrat Shastri
C-248 Defence Colony
New Delhi
पिन PIN 1 1 0 0 2 4

यहाँ काट कर खोलिए TO OPEN CUT HERE

दूसरा मोड़ SECOND FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURE ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :– SENDER'S NAME AND ADDRESS :–

Ch S Rao, I-B Madhuban
Gen J. Bhosale Marg, Mumbai
पिन PIN 4 0 0 0 2 1

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

स्वास्थ्यं शरीरे मनसि प्रसादो
यत्रे सदृष्टिः सुख-शान्ति-मुक्ता ।
भक्तिः परेशे विपुलं यशश्च
भूयाद् भवद्भ्योऽत्र भवद्भ्य आशो: ॥

इति स्वाशयं निवेद्य
तत्रभवत्सु भवत्सु सम्मान्येषु ।
कृपाकाङ्क्षी विनीतो

विरमति ना(म्ना) कञ्जर: ॥

विद्या – वैभव – भवन

सुमेरुकर्ण - मार्ग, रामगञ्ज
जयपुर-302003 **(राज.)**

भारत INDIA
25

सेवामें -
परमादरणीय
पद्मश्रीविभूषित
म०म०राष्ट्रपति-सम्मानित श्रीयुत
डॉ० सत्यव्रतजी शास्त्री
3/54
रूपनगर
P.O. - नई दिल्ली

पिन PIN 1 1 0 0 0 7

भा.प्र.सु./I.S.P.-2000 पोस्ट कार्ड POST CARD

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्रीमकाशय

॥श्री:॥

मान्या महान्तो महनीय-भागा, दीपावली-पर्वणि मे नमांसि ।
स्वीकर्तुमार्या: कृपया भवन्तो, कुर्या: प्रसीदन्त्विति प्रार्थयेऽहम् ॥
सम्पूज्य लक्ष्मीं धनधान्य-दात्रीम्, आर्या:! भवद्भ्य: सकुटुम्बकेभ्य: ।
याचेऽद्य दीपावलि-पर्वणीह, स्वास्थ्यं समृद्धिं च सुदीर्घमायु: ॥
महार्घतायामपि जीवनार्थं, यथाकथञ्चित् सुखदे घमस्तु ।
पर्वान्यथाऽनन्दकरं सदैव, कोऽपीति तेभ्यो धनिको अलेभे ॥
गृहं न वस्त्रं वसनं न धूर्तं, रवाद्यं च पेयं सुलभं न येषाम् ।
न रोचते पर्व कदापि तेभ्यो, दीपावले: स्यादुत होलिकाया: ॥
प्रशासका हन्त! समाज राष्ट्रे, सदृक्षमुल्लङ्घ्य दुराचरन्ति ।
तदेव दुर्यन्ति च चिन्तयन्ति, सिध्येद् यथेष्टं न तदीयमेव ॥
नलोक-कल्याणमभीष्टमेषां, स्वस्यैव कल्याण-चुलीं रलालाम् ।
आपूरयेयु: स्वमतं यदाद्य, पश्चात्तापस्त्री जवलाऽद्य तन्न ॥
निर्वान्त्वये: सर्वजि दीपका: परम्, आशा-प्रदीपो ज्वलितोऽस्तु सर्वदा ।
दर्भं हि यस्मादवलाऽद्य लिप्सुक:, रजोऽपि लोकाग्रसरत्व दीपकि ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

39

श्री:

आचार्य च[illegible] २००१ नव स्त्रीष्टवर्षीये शुभकामना

राष्ट्रपति पु[illegible] सम्मानित
बाबुरी बेगमपुर, पटना सिटी

कालः कल्पान्तकारी कलयति जगती जीवन श्रयुरेतत्,
वर्षंत स्यैक खण्ड भवति सुविदितं कर्मभिस्स्वेव युक्तैः।
युक्तु द्धे रुग्र कर्म प्रशमन करणे सौमनस्य प्रसारे,
आतङ्कात् त्राणदाने कव त्वहरमिदं नूतनं वत्सरं स्यात्॥

भवदीय।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

सप्रणामं श्रीचरणानां मई-
मासान्तेऽपि सुदर्शनाभिलाषो
नैव सिद्ध्यति इच्छा तु महती
चिन्ता करीवर्ति। तदुत्तरं
पत्रमपि आवश्यं नैव किञ्चिद्
अधिगमम्- अस्माच्च चिन्ता-
तिशयो वेजिघ्यते एव। कृपया
स्वकीय-कुशलतां सेसूच्य
निश्चिन्तो विधातव्योऽस्मान्
अवकीय; सर्वथा विधेय'
कृपाकाङ्क्षः

श्रीमाद्चरणाङ्गेषु सप्रेमाणाम
मे सविनय-नमस्तत्यो जिजेज्ञेच्चाच्चो

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

M/S.P.P.HYD.- 2006 पोस्ट कार्ड POST CARD

प्रतिष्ठाम् परमादरणीय
प्रो॰डॉ॰सत्यव्रतजी शास्त्री
सी-२५८ डिफैंस
कालोनी
नई दिल्ली
पिन PIN 1 1 0 0 2 4
(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

नई दिल्ली

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दूरभाष: ०१५१-२६००/२२ ॥ श्री: ॥ जयपुरत: 18-7-2007 दिने

श्रीमन्त: परमादरणीया विद्वन्मण्डलाय: ! सर्वहृदयं वन्दे।
आशासे, सपरिवारा: सकुटुम्बाश्च तत्रभवन्तो भगवत: सर्वथा
सकुशला एव भवेयु: ।

16.8.2006 दिनाङ्के अहं स्पीड पोस्ट द्वारा स्वकीयं 'राष्ट्रस्मृति' पुस्तिकां श्रीमतां सेवायां सम्प्रेष्य तद्विषये स्वामि-प्रायान् मत्सविधे सत्वरमेव प्रहेतुं निवेदितवान् आसम् । पुनस्तदर्थं 15-9-2006 दिनाङ्केऽपि एतद्विषये श्रीमतस्तत्र-भवत: संस्मारयितुं धृष्टतामाचरम् ।

परन्तु सुचिरं प्रतीक्ष्यापि अद्य यावद् भवदीय-स्वामि-प्राय-प्राप्ति: सर्वथा वञ्चित: सन् साम्प्रतमेतेन पत्रेण पुनरपि सविनयं सभक्ति संस्मारयामि । पि.।

आशासे, वृद्धाया मम पत्न्या: [illegible] एव सेत्स्यति ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

नमः स्वस्त्यस्तु कुबेरेह-
मधि मान्याः! सभाजिन्यो भवद्भ्यः।
औपत्क-पत्र-दृष्ट्या
शुष्क-जीवने हरिताय्यते ॥

सर्वविध-कुशलाकाङ्क्षी
औपत्को विनयावनतः

[illegible]

१६-५-२००७

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

50

परमसम्मानपूर्वं प्रणतिः

प्रो० डॉ० सत्यव्रतजी शास्त्री
सी-२५४, डिफैंसकालोनी
नई दिल्ली

पिन PIN 1 1 0 0 2 5

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

प्रमु./S.P.P.,HYD.-2006 पोस्ट काई POST CARD

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्रीः जयपुरतः

श्रीशारदायाः सुतरत्नभूताः, सत्यव्रतारव्याः सुधियां वरेण्याः।
सभ्रातृकेभ्योऽत्र भवद्भ्यः, स्वीया नतीः सादरमर्पयामि ॥

चिरात् कृपापत्रमनाप्य चारु, भृशं प्रसादोऽजनि मे कुटुम्बे।
आसन्न-काले भवतः स्वमध्ये, दृष्ट्वैव भूयाद् द्विगुणः प्रसादः॥

श्रीभ्रातृपादानपि सार्धमेव, दुर्द्रुः सुखं द्रष्टुमितुं भवन्तः।
तासो दिदृक्षाऽपि यतोऽत्र सर्वान्, विबाधते नः सततं हि मान्याः! ॥

नूतनं खिन्निदियासि सूच्ये, राष्ट्रस्य चेर्मे विजये स्वकीयान्।
विचार-राशींस्तु प्रदातुमाशु, सेत्स्यामि यत्पश्चथ पुनः पुनर्वः॥

मासैक-पूर्वं भवतां समीपे, 'राष्ट्र-स्मृतिः' सेयमितो मया हि।
सन्प्रेषितास्ति, विमृशन्तु तत्रेदं, भवद्विचारानिह सम्प्रतीक्षे॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



प्रणम्य मातृपादाब्ज-
युगलेऽस्मदीय-प्रणतयो निवेद्या
लङ्कानि-वासप्राप्ति
समेधत एव शुक्लेन्दुवत् ॥०॥
निजाग्रजोऽस्मिन्
श्रीध्रुव त्युपाख्यानिकाकारी।
कवि-कोविद-चिकीर्षोश्चे
कश्चन नारायणाकारः ॥१॥

वैशाख कृष्णाष्टमीया गुरुवासरे:
वि.सं. २०६७

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

50

भारत INDIA
शैल कृत रथ, महाबलिपुरम
ROCK-CUT RATHAS, MAHABALIPURAM

सेवा में -
पद्मश्री राष्ट्रपतिसम्मानित
प्रो० डा० श्री सत्यव्रत जी शास्त्री
सी-२५८,
डिफेंस कालोनी

मप्र/S.P.P.-HYD.-2006 पोस्ट कार्ड POST CARD

पिन PIN 1 1 0 0 2 4

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

दिल्ली

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्री:

चतु:षष्टयधिकोविंश, एष नूत्न-वैक्रम-वर्षो भवते ।
मङ्गलमयोऽस्तु नित्यं, सुखकारी हर्ष-वर्धुकश्च ॥ १ ॥

दु:खं भवतु नकदापि, साफल्यं लभतां प्रतिपदं भवान् ।
सकुटुम्बोऽस्तु स्वस्थो, दीर्घायुर्यशस्वी सदैव ॥ २ ॥

आर्ये श्रीमद्दर्शन, - लालसा मनस्येव मनसि स्थिता ।
अपूर्णमिमां अीक्षा:, विपत्तौ इति तं याचेऽहम् ॥ ३ ॥

श्रीमद्भिर्ज्ञाते मान्या:! स्मारकं वचसोऽस्य मे -।
ऋषीणां पुनराधानं, वाचमर्थोऽनु धावति ॥ ४ ॥

स्वीकृतिं सूचकं पत्रं प्राप्तं, तत्प्राप्ति-सूचकम् ।
चापि पत्रं प्रदत्तं हि, प्रेषकायाधुनाऽमुया ॥ ५ ॥

इत्येव तत्र-पूर्त्तेऽस्ति, नान्यद् विद्यते किञ्चिद् लक्ष्यम् ॥
अत: सम्प्रति विरमामि, प्रणमन् बहुकृतज्ञो श्रीमान्यो:! ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

यथा: शरीरेण सुजीवकार्थं, क्रियेद् विशिष्टं तु विधेयमेव।
स्वनाशयन्त्या: जलयो: पुराणा, नाल्पीकृते-तुल्या रहे सनेति इत्थं:

मनीषितं मे सकलं समस्तं, मनुस्मृतेर्यद् विदुषेदमेव: ।
अनुग्रहस्तस्य महामहीयान्, आरम्भो विघ्नविधुप्रणाशी-
-आर्या: ।। स्वत्वं विनिवेद्य चेति;
श्रीजगदम्बिकायै च वन्दनम: ।
विनम्र-अभिनन्दन

विद्या - वैभव - भवन
पूर्णिकम - मार्ग, रामगञ्ज
जयपुर-302003 (राज.)

(13)

P.S. / S.P.P. - 2004 पोस्ट कार्ड POST CARD

PHILATELY: KING OF HOBBIES
Collect Postage Stamps
CONTACT :
Nearest Philatelic Bureau

सेवामें
परमश्रद्धेय -
पद्मश्री-म.म. राष्ट्रपति-सम्मानित
प्रो० डॉ० श्री सत्यव्रत जी शास्त्री
सी-248, डिफैंस कालोनी
नई दिल्ली

पिन PIN | 1 | 1 | 0 | 0 | 2 | 4 |

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

Phone: 24336644,
24336631

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

५५१९
24-3-2005

श्रीशः पाथात्

दूरभाषः (०141) 2600122

भो सात्त्विकाहार-विहार-शीला, मिथ्या-प्रपञ्चच्छला-शून्य-शून्याः।
मा-शारदायाः सुतरत्न भूता, नमो भवद्भ्यः सततं नमोऽस्तु ॥१॥

पत्र-प्रसादं भवदीयमिष्टं, सुस्वाद्य मास्वाद्य परं प्रसन्नः।
मन्ये स्वमात्मानमतीव धन्यं, स्निह्यन्ति यस्मिन् सुधियो भवन्तः ॥२॥

विशेषणैर्वै जिनमेतकं भो, संशोजयन्ते प्रतिवारमेव।
तथाव्रतां नैव कदापि यत्ते, पिपीलिका चुम्बति किं सुधांशुम्? ॥३॥

बहूक्तिकार्यं न तथास्ति जीवनं, स्व-पत्रके यास्लिखितं सनातनम्।
तथैव तन्नूनमिहात्र वर्त्तते, मान्या! विरुद्धं प्रकृतेः क आचरेत्? ॥४॥

स्वास्थ्यं स्वकीयं च सुरक्षतैव, कार्यं कथाशक्ति विधेयमत्र।
सर्वोऽभिलाषो न कदापि पूर्णः, सञ्जायते कस्यचनापि पुंसः! ॥५॥

एवं विचार्यैव प्रवर्त्तयमत्र, स्वात्मा किमर्थं परितापनीयः?।
येभ्यः श्रमो भूरि विधीयते हा!, पृच्छन्ति नं तेऽपि दिवङ्गतं नम् ॥६॥

एवैव रीतिर्जगतीह मान्याः! चिराच्चलन्ती इशमेति मनु।
मन्ये भवन्तोऽपि समर्थयेरन्, मन्तव्यमेतद् कतु नानकीनम् ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

* आगमशास्त्रस्य अधित्यकायाम्नाय तुङ्ग।



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥ दीपमालिका सं० १९

दीपावलीयं भवतां कुटुम्बे, वृध्यात् सुखं शान्तिमथो समृद्धिम्।
लक्ष्मी-प्रसादाच्च सुदीर्घमायुः, सस्वास्थ्यमास्तां भवतां समेषाम्॥१॥
अनीतिवादोऽथ, महार्घताऽपि, सन्तापयेत्तां भवतः क्वचिन्न।
भक्तिः स्वदेशेऽथ रतिः स्ववाण्यां, प्रवर्धतां भो! भवतां सदैव॥२॥
ईशः स्थितिस्तिष्ठतु सर्वदैव, परोपकारात् विरतिर् भवेन्न।
दीनेषु कारुण्य-परं मनोऽस्तु, सद्बुद्धिरास्तां रचनात्मिका चा॥३॥
ईदोत्सवो दीपमहोत्सवेन, सहागतो विश्व-शिवाय भूत्यै।
ददातु प्रत्येक-जनाय सद्यः, स्वाभीप्सितं कामप एवमार्याः!॥४॥
दीपावली-पावन-पर्वणीत्थं, लक्ष्मीं भवद्भ्यो हृदयेन याचे।
कृपाविशेषं चापि भवद्भ्य इच्छन्, ईहेव मान्याः! विरमाम्यहं भोः!॥५॥

सादरं सप्रेम वन्दनाः—

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

विद्या - वैभव - भवन
सुमेरुकर्ण - मार्ग, रामगञ्ज
जयपुर-302003 (राज.)

नमांसि भूयांसि भवद्भ्य आर्याः!
दीपावली-पावन-पर्व-काले ।
प्राप्नोमि प्रत्यब्दमहं भवद्भ्यः
शुभाशीर्षं मङ्गल-कामनां च ॥१॥

अहो मदीयं महदस्ति भाग्यं
स्निह्यन्ति नित्यं मयि यद् भवन्तः ।
कार्तव्यमस्मै गदितुं तु मान्याः!
ब्रूवे दरिद्रोऽस्मि, कृपा न वाच्मि ॥२॥

स्पर्धे न यावन्मनसो न शान्तिर्
दीपावली-पर्व कथं हि मान्यम् ?
दरिद्रता चापि पुनः सहर्षं
सम्पादने ऽवास्त्यनि काधिकैका ॥३॥

अनङ्कनादेन विनद्ध एष
देशोऽस्मदीयोऽद्यति पीडितोऽस्ति ।
अज्ञान-गाढान्धतमोऽसतां हि
दीपावलीयं कुरुतात् विनष्टम् ॥४॥

लक्ष्मीर्यथा स्याद् चलदा समेषां
बुद्धिं च संशोध्यथतात् यथैव ।
लक्ष्मीं तथा मातरमेव मान्याः!
सम्प्रार्थये सत्य-हृदा स-नाम्नम् ॥५॥

. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan K

प्रतिष्ठा में,
प्रमुख संस्था अधिकारी
पक्का की विधायिका सं. सं. राष्ट्रपति मंत्रालय

डा. श्री सत्यव्रत जी शास्त्री

सी-24-8,

विवेक विहार

नई दिल्ली

पिन PIN 110 082 4

भा.डा.वि. / I.S.P. - 2000 पोस्ट कार्ड POST CARD

स्वास्थ्यं शरीरे मनसि प्रसादः
आत्मिन्यमीशे ऽतुलितं सदृष्टिम् ।
आयुः सुदीर्घं विपुलं यशश्च
लक्ष्मीः प्रदद्यात् सततं भवद्भ्यः ॥८॥
सार्धं कुटुम्बेन मनीषि-वर्याः !
दीपावली-माङ्गलिकोत्सवे ऽस्मिन् ।
लक्ष्मीः सदैवं प्रसकृद् भवद्भ्यो
याचामि ॥ ॥ शुभ-कामनाः ॥८॥

दीपावलि पर्व संवत् वि. सं.

Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan

Prof. Sitanath Acharya Sastri, M.A.,Ph.D.
Gold Medalist
Kāvya-vyākaraṇa-nyāya-tarkatīrtha, vidyātīrtha.
MM. Gopinath Kaviraj Professor (Former Head)
Convener of M.Phil . Committee
Department of Sanskrit, University of Calcutta,
Calcutta-700 073

Residence :
A F 177, Rabindra Pally
P.O. Prafullakanan,
Pin-~~743511~~, 700101
Kolkata ~~Calcutta-59~~ W. B.
✆ :(033) 5710074

Date.....16/10/02.....

To
Proj. Satyavrat Shastri

श्रीशारदीयविजयातिथिरद्य धन्या
सर्वैः सुमान्यविबुधैर्जननीव मान्या
दुर्गाप्रसादफलीकृतजन्मलग्ना
वर्षान्तरे पुनरहो सुखमागतास्ति ॥

अस्मेदं भुवनं विभात्यभिनवं दिव्यप्रमोदभावितं
वस्त्रान्नादिगता गतेव नियता या भावना पार्थिवी ,
सर्वे जीवगणाः प्रफुल्लमनसो लीनो विभेदोऽधुना
दूरादेत्य मिथो मिलन्ति मनुजाः स्निग्धैरघोरं जनैः ॥

अस्मिन् पुण्यतमे लग्ने विजयानामके शुभे ,
श्रद्धासौरभसंयुक्तप्रणामकुसुमाञ्जलिः ॥
सारस्वततपःसिद्धे ! सौजन्याम्बुपयोनिधे !
समर्प्यते पदाम्भोजे भवतो नम्रचेतसा ॥
आशीः कराङ्किता कापि भवतः स्नेहसंयुता ,
प्रेष्यतां कृपया येन कृतार्थः स्यादयं जनः ॥

इति
प्रणामनम्रहृदय
श्रीसीतानाथआचार्यशास्त्रिणः

देहल्यां विश्वसंस्कृत-
सम्मेलनावसरे भवतः
सान्निध्यलाभेन जनोऽयं
कृतकृत्यो जातः , अर्पितवान्च
भवतः करकमलयोः स्वरचितं
ज्योतिष्काव्यद्वयं भावविलक्षितमिति
सिन्धुवर्तुरैवविलक्षितमितिच ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

VEDIC RESEARCH HOUSE

Maharshi Sandipani Muni श्रीः

Prof. Dr. Dhyanesh Narayan Chakrabarti
Shastri, Vachaspati, Bhaktiratna, Prajnabharati, M.A. Ph, D.Litt
RETD. HEAD, DEPARTMENT OF SANSKRIT, RABINDRA BHARATI UNIVERSITY
Member-MS. Veda-Vidya Pratisthan, Ujiain, Sanskrit year Committee, Govt. of India,
WORKING PRESIDENT—Sri Sri Sitaramdas Omkarnath Samskrita Siksha Samsad.
PRESIDENT—Bharat Sanskrita Parishad, Bharatiya Sanskriti Sangha,
Vivekananda Krishti Parishad, Bharatiya Puran Patishad.
FELLOW—United Writers' Association, Chennai.
FORMER NATIONAL FELLOW—Vedic Studies, Govt. of India.
EMERITUS FELLOW IN CULTURE, GOVERNMENT OF INDIA.
RECIPIENT OF PRESIDENTIAL & BHARAT GAURAV AWARD.

Residence :
"RISHI-DHAM"
P.O. Dattapukur, Dist. 24 Pgs. (N)
Pin—743248 West Bengal, India
Phone : [STD-033]-536-4440

परम श्रद्धेय-महामहोपाध्याय-पद्मश्री पुरस्कृतेभ्य: 29.9.2003

भ्य: सत्यव्रतशास्त्रि-महोदयानां शुभजन्मवृद्धिदिवसे

शुभाभिनन्दनम्

द्यौर्मे मूर्धा नक्षत्रि निण्यं रथन्तरं पृथिवी दासये
सिन्धवे च प्रसवन्ति यस्यो सर्वमास्त्वभिरामम्।
स वं श्रीमन् भगवति विलस त्वात्मनाद्वान्यपूर्णै-
र्नीथाभैव सुख-सुमुदित: श्रेयसा वर्धितायु:॥

दिगन्त-विश्रान्त यशोधनाय
प्रेमावदाताय बहुश्रुताय
निवेदयामो बहुमानपूर्वं
श्रद्धार्घ्यकं ते परिगृह्यतां मे॥

कुमि

प्रेमधन्येन गुणमुग्धेन

श्री श्यामेश नागपुर चक्रवर्तिना

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ओं : ॐ

मा - शारदायाः प्रिय - वत्स - वर्य्यां, विडम्बकेभ्यः कवि - वृन्द - वन्द्यः ।
सत्य व्रताः सार्थक - नाम धन्यो, नमो नमस्तत्र वकुलवक्त्र्य ॥१॥

त्रिंशे हि नाद्रे गत - प्राय एव, शुभाक्षरैरङ्कित पत्रमेष च ।
चिराय भावज्ञ मनोज्ञ मान्यः! मोदं लभेऽतीव लिखामि सत्यम् ॥२॥

चिन्ताऽतिशां या भवतः कलीन्द्रान्, तोतोत्थ हं चापि तयैव तुन्नः ।
मा शारदा केवलमावयोः, शं कर्त्तेति नावाति विचिन्त्यतोयम् ॥३॥

सत्यं हि काव्यः कृश एव नूनम्, आलम्बार्थं तत्र तथास्ति नैव ।
बलिष्ठ आलम्ब समस्तशिष्टं, सोऽस्तिद्विजापादयितेति वेद्यम् ॥४॥

बलिष्ठ व्यते तस्य प्रकाशनार्थं, व्यधीकृतेऽपि निज - चित्त - राजौ ।
क्रेताऽन काश्चिन्निलते तदीयः, प्रकाशनं नश्यति हा! तदित्थम् ॥५॥

पाठच क्रमे यस्य नियोग आसते, क्रीणन्ति छात्रा कलि तत्तदेव ।
क्रीत्वा परं तत् पठितुं प्रभुर्नेद्, हा हन्त! विडम्बस्यापि नेक्ष्यतेऽच ॥६॥

लेखव्यं प्रकाश्यं विपुलं धनं स्वं, व्यर्थं व्यधीकृत्य निजार्थ मेव ।
अयं विचारश्च पुनः पुनर्मे, मान्यः! शिरो घूर्णयते निताम्ताम् ॥७॥

प्रकाशकाश्चापि कृपाकरा न, सन्तेऽपि ते लेखक - शोषका हा!
प्रकाशकाः सम्यङ् मजीवयन्ति, विनिन्द्यलं किन्तु न लेखकान्हि ॥८॥

इत्थं विचाराकुलितो न वक्ति, कर्त्तव्य - मार्गं सुधेयः स्वकीयम् ।
ब्रूवन्नु मां किं करवाणि मान्यः! यतो भवन्तोऽनुभवे महान्तः ॥९॥

सद्भि र्मनीषिः सह सङ्गतिर्मे, रोचते शब्द - चयैरवर्ण्यैः ।
[illegible] याचेऽहं [illegible] प्रणम्य ॥१०॥

[illegible] मे, परात्परस्यानु गृहीतिरेषा ।
मा - शारदाऽच्यच न मुञ्चतु स्वां, कारुण्य - दृष्टिं शिव मादधानाम् ॥११॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

स्वस्था भवेन्मेजननीव पूज्या, माता भवच्छक्ति-प्रदायिजीहू ।
तत्पाद-पद्म-द्वयके प्रदीयाम्, अर्पंरव्य-साक्षाद्- नती र्भुवन्तु ॥१२

स्वस्था भवन्तोऽपि दीर्घमायुर्, यशः सवृद्धिं परिलभ्य मान्याः ।
सरस्वती-कोष-समेधनेरचं, यच्छन्तु योगं सतत प्रशंस्यम् ॥१३

पुत्रैः प्रपौत्रैः सह कन्यकाभिः, प्रमोदमानाः परिवार-मध्ये ।
समान्यमानाश्च सुधी-समाजे, जीवन्तु सौख्येन सहस्र-वर्षान् ॥१४

इति स्व-हार्दं विनिवेद्य मान्याः ! श्रीभट्ट-कृष्णेप्सुः सुधियां धुरीणाः !
गणेशः कञ्जर एष नित्यं, नमामि हैवाति विराभमध्य ॥१५॥

२९-५-२००४

विद्या – वैभव – भवन
पुष्पेश्वरणं - मार्गं, रामनगर
जयपुर–302003 (राज.)
दूरभाष :
0141-2600122

डॉ० सत्यव्रत जी शास्त्री
सी-२४०, डिफेंस कालोनी
नई दिल्ली - 110024
दूरभाष :
24336644,
24336631

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

PROF. DEV DATT BHATI
SHASTRI, P.E.S. (I) Rtd.
Hon. Director

Phone : ( )
VEDIC RESEARCH HOUSE
Delhi Gate,
MALERKOTLA - 148023 (Pb.)

RCPNT. of :
- 'PRESIDENTIAL CERT. OF HONOUR' National Award Govt. of India.
- 'Shiromani Sahityakar' Punjab State Award Rs. One Lac & Gold Medal Etc.
- International Awards I.B.C. Cambridge U.K. & A.B.I. Releigh U.S.A.
- & Many Awards Gold Medals from States, Universities & Academies in Social Work & Literature
- Director J.C.W. Malerkotla.
- Former Principal G.C. & J.C.W. Malerkotla.
- Ex. Senator Kuruksetra University
- *Patron :* Hindi Sahitya Sammelan
- *President :* Pb. Sahitya Sangam Pbi. Univ. Skt. Teachers Association
- Pioneer of New Style in Sanskrit Poetry
- *Author of :* 16 Books & about 300 Papers in Skt., Hindi, Eng. & Pbi.

Ref. No. : _____ *Dated :* 6/12/2003

श्रीभृतो भगवत्पादाः !

नमांसि भूयांसि चरणनलिनेषु ।

अवाप्तं भवतां पत्रं चक्षुषोः व्याधि-सूचकम् ।
पठित्वा तद्गिरां रत्नं परं खेदं गतं मनः ॥
दुःखप्रदा पुरैवासीद् रुजा मातुरनुन्तुदा ।
तत्रापि भवतां कष्टं ज्ञातं चेतः-प्रमाथि हि ॥
गुरोः गुरुतरं कष्टमसह्यं सुतरां मया ।
कथमपाक्रियेतेदं चिन्ता मां बाधते भृशम् ॥
दूरस्थो भवतां शिष्यः सदा सेवा-समुत्सुकः ।
प्रतीक्षते भवद्दिष्टिम्, आदिशन्तु यथेच्छितम् ॥
नात्र कश्चन संकोचः करणीयः कथंविधः ।
समर्थः सेवितुं ताताः ! यत्र कुत्रापि प्रेरितः ॥
द्विसप्ताहमतिक्रम्य प्राप्तं पत्रं चिरान्ननु ।
पत्रोत्तरे विलम्बोऽयमुपेक्ष्यो गुरुभिर्मम ॥

पद्मश्री-महामहोपाध्यायाः
डा० सत्यव्रत शास्त्रिणः
सी-२५४, डिफेन्स कालोनी
नवदिल्ली - २४

पुनीत प्रत्यग्र पादपङ्कजान्
साम्रेडमापीडयन् देवदत्तः
[signature]

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

राष्ट्रिय संगोष्ठी

वैदिक साहित्य में विज्ञानविषयक तत्त्व

(महर्षि सांदीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान, उज्जैन द्वारा प्रायोजित)

15-16 अक्तूबर 2003

संस्कृत एवं प्राच्यविद्या संस्थान

कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र-136119 (हरियाणा)

डॉ कृष्ण लाल
बिश्वबनीड - ई ९३७,
सरस्वती विहार, दिल्ली-११००३४

२१.९.२००४

परमश्रद्धेया गुरुवर्याः,

स्वीक्रियतां मे विनम्रः प्रणामाञ्जलिः।

शार्दूलविक्रीडितपद्यबद्धं पत्रं गुरूणां सुमनोज्ञमस्ति।
स्मेराननांस्तेन पुरःस्थितान् मे पूर्वं यथाभूत् सपदि स्मरामि ॥१॥
अहोभाग्यमेतन्मदीयं नदासीत् नटे ज्ञानसिन्धोरविन्दं सुयुक्ताः।
अपृच्छं गृहं चैव गत्वा स्वशङ्काः अभूवं न तृप्तः कुतो ज्ञानतृप्तिः ॥२॥

महाब्धेः सकाशं पिपासास्ति वृद्धा विचित्रः सुपुष्यात्तु भावो मदीयः।
न वाल्येव किंचिद्विचित्रं महान्तः पिपासुर्जनः स्यात् पुरातोयराशेः ॥३॥

स्वानि वित्त्वान्यजनास्यास्ति तुष्टिः श्रेयश्च लब्ध्वा जयमस्तु हृष्टिः।
पार्श्वे गुरूणां स्थित एव शिष्यः शिक्षेत तत्त्वं न त्वन्यतिक्वचन्म ॥४॥

जीवने धन्यतां लब्धं सर्वं गुर्वनुकम्पया।
गुरुर्निदर्शितः पन्थाः कस्य न हितसाधकः ॥५॥
गुरुस्वमी र्वदिव्यो धोरनमोविनायकः।
निर्झरोऽविरतो गच्छन् बुद्धिप्रक्षालनक्षमः ॥६॥
वेदज्ञानस्य सन्मार्गो यैरद्य मे प्रदर्शितः।
ज्ञानसागरभूतांस्तान् तथ्यद्यं प्रणमाम्यहम् ॥७॥

विनीतः

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

राष्ट्रिय संगोष्ठी

वैदिक साहित्य में विज्ञानविषयक तत्त्व

(महर्षि सांदीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान, उज्जैन द्वारा प्रायोजित)

15-16 अक्तूबर 2003

संस्कृत एवं प्राच्यविद्या संस्थान

कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र-136119 (हरियाणा)

डॉ कृष्ण लाल
विश्वनीड - ई ६३७.
सरस्वती विहार, दिल्ली-११००३४
कार्तिककृष्णा द्वितीया सं. २०६१
३०.१०.०४

परमश्रद्धेया गुरुवर्याः,

प्रणतिपुरस्सरं निवेदयामि

गुरुकृपा न हि तुल्यत एव भोः
किमपि तत्समभेव न दृश्यते।
फलमिहापि तदाशिषि गुह्यते
समयपक्वमिहाधिगतं मया ॥१॥

श्रीमताशिषा लब्धो वेदवेदाङ्गसंज्ञितः।
आर्यसमाजमुम्बय्यां सान्ताक्रुजे प्रतिष्ठितः ॥२॥
पुरस्कारो महान्ज्ञानो वेदविद्भिश्च कांक्षितः।
चतुर्विंशे दिने तत्र प्राप्तुमालं गतो ऽञ्जसा ॥३॥
सदाशीर्गुरुणां ~~च पूर्णं~~ समूवाद्य पूर्णा
मनश्च प्रसन्नं महातोषलाभः।
भवत्वाशिषो मे सदैवाद्य शीर्षे
समुत्कर्षपुण्याः सदा शोभनास्ताः ॥४॥

संस्मृत्य संस्मृत्य कृपां गुरूणां
आनन्दरत्नाकरमग्नदेहः।
भूयश्च भूयोऽयमनन्य शीर्षं
सद्यः प्रणामान् समर्पयामि ॥५॥

विनीतः
कृष्णलालः

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

राष्ट्रिय संगोष्ठी

वैदिक साहित्य में विज्ञानविषयक तत्त्व

(महर्षि सांदीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान, उज्जैन द्वारा प्रायोजित)

15-16 अक्तूबर 2003

संस्कृत एवं प्राच्यविद्या संस्थान

कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र-136119 (हरियाणा)

डॉ कृष्ण लाल
विश्वनीड - ई ९३७,
सरस्वती विहार, दिल्ली-११००३४
कार्तिककृष्णा द्वितीया सं. २०६१
३०.१०.०४

परमश्रद्धेया गुरुवर्याः,

प्रणतिपुरस्सरं निवेदयामि

गुरुकृपा न हि तुल्यत एव भोः
किमपि तत्समभेव न दृश्यते।
फलमिहापि तदाशिषि गुह्यते
समयपक्वमिहाधिगतं मया ॥१॥

श्रीमताशिषा लब्धो वेदवेदाङ्गसंज्ञितः।
आर्यसमाजमुख्यायं सान्ताक्रुजे प्रतिष्ठितः ॥२॥
पुरस्कारो महान्प्राप्तो वेदविद्धिश्च कांक्षितः।
चतुर्विंशे दिने तत्र प्राप्तुमालं गतो ऽञ्जसा ॥३॥
सदाशीर्गुरुणां ~~सदा पूर्णा~~ बभूवाद्य पूर्णा
मनश्च प्रसन्नं महातोषलाभः।
मनस्वाशिषो मे सदैवाद्य शीर्षे
समुत्कर्षमुख्याः सदा शोभनास्ताः ॥४॥

संस्मृत्य संस्मृत्य कृपां गुरूणां
आनन्दरत्नाकरमग्नदेहः।
मुहुश्च मुह्यो ऽयमनन्य शीर्षं
नयः प्रणामान् समर्पयामि ॥५॥

विनीतः
कृष्णलालः

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

२००५ ई० नववर्ष-कामनाः

सत्यव्रतारव्यं सुधियां वरिष्ठं, मा-शारदायाः प्रिय-पुत्ररत्नम् ।
दिल्ल्यां वसन्तं सह धर्मपत्न्या, मोघुद्यमानं प्रणमाम्यनल्पम् ॥१॥

शुभाशिषं नूतन-वर्षकादौ, सम्प्राप्य मोदेऽत्र भवद्-भवत्तः ।
चित्रं द्विगीर्यं प्रहितं तु यत् स्वं, तन्ने प्रहर्षं द्विगुणं तनोति ॥२॥

वागभ्रपूर्णाक्षि-मितोऽचिरं हि, खेस्तः समेष्यन्नववर्ष एषः ।
भव्याय यूथाद् भवतः कुटुम्बे, सद्दृष्टिदाता सुखशान्ति-वर्षी ॥३॥

स्वास्थ्यं नवाब्दे लसतां क्वचिन्न, शक्तिः परेशोऽविरतं समिन्धाम् ।
दीनेषु कारुण्यमयोपकारो, न्यूनो क्वचिन्मा भवतां कदापि ॥४॥

यथाः प्रतिष्ठा प्रचुरं च वित्तं, मिलेद् यथेच्छं सकलार्थ-सिद्धये ।
मा-शारदा-कोष-समेधनार्थं, सुचिन्तनं चेतसि नित्यमास्ताम् ॥५॥

आतङ्कतः स्वं परिरक्षितुं च, बलं प्रभूतं भवतीह भूयात् ।
महार्चनायोऽपि च शोधनार्थं, करोतु साहाय्यमलं सुलक्ष्मीः ॥६॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ सत्यं तत्त्वी तत्त्वी सत्यमुच्चरे वयिद्यानसर्वविधं मदीय।
न सूनसंऽगच्छतु किञ्चन मार्ग-शक्ति, तिष्ठेत्तु सोत्साहजयं समेतो॥

— ८ —

नमस्ते! कालेकर परिवार, प्रमोद-कोमल्लिनी नेय हर्ष।
आशीर्वाद लेकर आशीर्वाद, नियम-नेत्राणि मुज्जयं॥

प्रेम - भवन
प्रेम कुटीर - मार्ग, रामगंज
जयपुर - 302003 (राज.)

मार्च २०१२

प्रतिलिपि -
श्रीयुत परमादरणीय
भ०भ० राष्ट्रपति - सम्मानित
पद्मश्री - डॉ० सत्यव्रत शास्त्री जी
C-248, डिफैंस कालोनी
नई दिल्ली - 110024

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्री: ॥

आर्ये परम-अद्वैया , ज्ञान-वैभव-समृद्धा बुध-मण्य: ।
अत्रभवतो भवतोऽद्य , नन्दे ऽभिनन्दामि नवाब्दे ॥
एक-षष्ट्युत्तर-विंश , एष वैक्रम-नूतन-वर्षो मान्या: ।
वितरतु सुधीधनियु: , सारोग्यं भवदभ्य: स्वेष्टम् ॥
नित्यं नव-नव-कृतिभि: , सारस्वत-कोषं वर्धयन्तश्च ।
विन्दन्तुतरां भवन्त , आर्या रह यश: सम्पदमपि ॥
आस्तिक्यं न लुप्येत , चित्ते प्रसाद: सदा विद्यतां च ।
सततं स्वजनेऽप्यास्थैर् , मुषाद्दृष्टिं निदधतु मान्या: ॥
इत्येव साशीहसात , आर्या! भवत्कृपा-कणिका-काङ्क्षी ।
विरमाम्यसद्वत् प्रणमन् , विदेन्द्रनारायणकुक्षे:

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



दूरभाष :
२६००१२२

विद्या – वैभव – भवन

सुमेरुकर्ण - मार्ग, रामगञ्ज

जयपुर-302003 (राज.)

परम सम्मान्य
पद्मश्री - सम्मानित
डॉ० श्री सत्यव्रत जी शास्त्री
C २४८, डिफेंस कालोनी
नई दिल्ली
पिन PIN 110024

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दीपावली: वि. सं. २०८२

दीपावली-पर्वणि पूज्यपादाः! शुभाशिषां लिप्सुरहं भवद्भ्यः।
अलं नमः स्वस्ति च सादरं भोः! ब्रवीमि भद्रं भवतीयमिच्छन् ॥१॥
हरिः स्थितं घोर-तमो जनानां, पृच्छेच्च लक्ष्मीं विनतेन् स्वकीयम्।
ज्ञान-प्रकाशं सुख-शान्ति-मूलं, सम्प्रार्थये तामिति सर्वदैव ॥२॥

स्वागतिरस्तु आगमी हे!, मिथस्तु दृष्टोऽपि निजेषु मत्र।
नैवाभिवादनाः समयानुपूर्वं, त्यजन्ति सेवारमिमं वराकाः ॥३॥
न जीवनस्य नाट्यस्य च जीवनस्य, विजानते मूल्यमभी विमूढाः।
स्वयं प्रियत्वेऽथ च मारयन्ति, लक्ष्मीः सुबुद्धिं विनतेदभीप्सुः ॥४॥
येऽत्रासि भारो जगतां सुकार्यैः, नित्यं नियोक्तुं बहुधा यतन्ते।
प्रशासकास्तेऽपि कुमार्गजाः स्वयं, वहन्ति दायित्वमरे! न किञ्चित् ॥५॥
निरङ्कुशं प्रस्तुतं जगत्यां, स्वातन्त्र्यमेजात्र विराजतेऽद्य।
नैवेह सेवारमणं समेषां, सम्भातमेतत् अथवापि सत्यम् ॥६॥
सत्यस्य लाभः परमस्ति नाद्य, सत्यं विलुप्तं बहु-पूर्वमेव।
सत्याश्रयीनः सुखमेधते न, जानाति जगत् इह-आस्थेयम् ॥७॥
सत्यव्रतः शान्तिवरो भजेद्यः, सौम्यः सुशीलो नहि दृश्यतेऽद्य।
असत्य-राज्ये कथमद्य जीव्यं? चिन्तेति चिन्तं परमं तुदन्ति ॥८॥
किं चिन्तया सेत्स्यति नेऽथवाऽद्य? सत्यव्रतः कोऽपि भजेदमेव।
वशीयं रक्षेत् सबलो जनश्चेद्, यथाकथं जीवितुमत्र शक्यम् ॥९॥
लक्ष्मीर्विरुद्धात् स्वदधातियं चेच्छुभं समेषामिह सम्भवेद्धि।
तामेव तस्मात् बहुशः प्रणम्य, सम्प्रार्थये ऽहं स्वतनं विनम्रः ॥१०॥
भवत्कुटुम्बेऽपि सदा हिरास्तां, स्वास्थ्यं च मूयाच्च सुदीर्घमायुः।
यच्चाप्यभीष्टं कृपया ऽच लक्ष्म्याः, सद्योऽखिलं तद् मिलतां भवद्भ्यः ॥११॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

भक्तिः स्वधर्मे भरतेश्वरेऽथ, प्रसादकारे रतिरस्तु नित्यम् ।
चित्ते प्रसादश्च गुरौ स्थितत्वं, लोकस्य लोकोऽपि सदैव मुह्यात् ॥
सर्वत्र प्रेम-व्यवहार-भाव, आत्मीयता सर्वजनेषु मुह्यात् ।
वञ्च्यते नाप स्वयमेव किन्तु, स्वल्पेऽपि वञ्च्येत कदापि नात्र: ॥
ऐक्यादि-दुर्भाव-लुते कदापि, स्थानं न चित्तेऽस्त्विह किञ्चनापि ।
सुस्निग्ध-दृष्टेः करुणार्द्र-चित्तं, सर्वत्र चित्ते सुरभ-शान्तये ॥
श्री राम-राम-प्रभविष्णु-भाव, जिह्वाग्र-चर्च्यस्तु प्रतिक्षणं मे ।
मुक्तेश्च लक्ष्येण सतदेव, सर्वोत्तमं साधनमस्ति नित्यम् ॥
दत्तेन याचन् भवदर्थमत्र, लक्ष्मीं परामेव सकलोद्य-दात्रीम् ।
भूयोऽपि मुद्रया: ! भवत: स्वभार्याम्, अलारं नौमि सम्मानमेव ॥
सुमेरुकर्णाध्वनि रामगन्धे, निलासकारी अधिवासनेऽस्तु ।
नारायण: कल्पितु एतमेव, शुभाशीर्वं वर्षिमे सदा भवन्त: ॥

प्रेषक:-
श्रीकृष्ण शरण मुद्गल
पद्मश्री - राष्ट्रपति - सम्मानित
प्रो० डॉ० सत्यव्रत जी शास्त्री
C-248 डीफेंस कॉलोनी
नई दिल्ली-110024

(5)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्रीरामः पातु सदैव हि

१

पद्मश्री-सम्मलङ्कृत-राष्ट्रपति-सम्मानित-मनीषिभ्यः।
नमः स्वस्त्यलं सभार्येभ्यः सत्यव्रतशारिद्र-पादेभ्यः॥

२

अयि भवदीयमसीमं, सौजन्यमौदार्यं किं वदामि?
यद् भवन्तः सभार्याः, स्त्यात्र मां प्रप्रुतवन्तः॥

३

तद्-दिनं तु कदापि नहि, विस्मरिष्यते मान्याः! जीवने।
यदा भवद्भिः स्वीकृतं, 'उणादिपदानुक्रम-कोषः॥

४

सदैव श्रीमातरं, चाप्यभिवन्दितुमभिनन्दितुं चात्र।
मिलितो योहि सुसमयः, स्मर्तव्य एव जातः सोऽपि॥

५

तदा गृहीत-चित्राणि, प्रादेशं प्रहिणोमि भवद्भ्यः स्मृत्यै।
प्राप्तिरेषा तु सूच्या, पत्रेण दूरभाषेण वा नेऽत्र॥

६

एकोमध्ये पत्रं, प्राप्तमासीदेकं मया भवताम्।
परन्तु नैतानि तदा, सम्मान्याः! सज्जितान्यासन्॥

७

चित्र-निर्मितौ विलम्बः, इहाजनि यो मान्याः! अनपेक्षितः।
क्षमां याचे तु तस्मै, क्षीणः स्वयमेव भूरि भूरि॥

८

समादृभ्यो भवद्भ्यो, नमो मे सकुटुम्बस्य पुनः पुनः।
अग्रेऽप्येवं भवतां, कृपा-कणिकां लिप्से सततम्॥

९

सकृद् घटित-सम्बन्धं, न कदापि विच्छेदन्ति मनीषिणः।
श्रुतमिदं मयकाऽसकृत्, कर्त्तारो न मृषा भवन्तः॥

१०

पुनश्च मम कुटुम्बोऽत्र, स्मारं स्मारं भवन्तौ दम्पती।
जयपुरागमनेऽग्रोऽपि, दिदृक्षते सोत्सुकयं नमन्॥

११

चतुश्चत्वारिंशत्-वैक्रम-वर्षो नूतन आ
क्षोभोतु भवद्भ्य आर्याः, वर्यो:!

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

आतङ्क-दशकण्ठमपि, काश्चिद् दाशरथिरवतीर्य निहन्तु।
येन विचरन्तु निर्भयः, सर्वोऽप्याबाल-वृद्ध-जनः ॥

१४

भ्रष्टाचारं तु नन्दन्तु, तुल्यं निहन्तु कश्चन चाणक्यः।
येन विशुद्धे पर्यावरणे सुजीवितुं शक्येत ॥

१५

मन-इच्छास्तु ममेताः, सन्ति मान्याः! प्रकाशयितुमिमा अहम्।
निवेदये जगदीशं, दयालुं शरण्यं सर्वदा ॥

१६

प्रार्थनैवैकमात्रं, वित्तं मेऽस्ति मान्या! महतो महत्।
तदेव साम्प्रतमस्मै, जगदीशायाहमर्पयामि ॥

१७

तुष्ट एतेनैष मे, जगदीशः पिपर्तु मनःकामनाम्।
श्रेयमेव मे वाञ्छा, नान्येति जानन्तु भवन्तः ॥

१८

प्रार्थनामात्रमेकं, कर्म कृष्णः कथितवानस्माकम्।
तत्-फलं तु न्यषेधीद्, अतः परमहं करवाणि किम्?

१९

प्रार्थनातिरिक्तमहं, किं कर्तुं शक्नोमि, दन्तु बुध्याः!
प्रार्थनां स्वीकुरुतेस, नवेत्यत्रे द्रष्टव्यमस्ति ॥

२०

आशा तु करणीयैव, यतो हि सैव जीवितुं परमं बलम्।
कृच्छ्र-गतोऽप्याशावान्, सन्तरति महाकृच्छ्र-सेमयम्।

२१

किमहं बहु निवेदये, विदित-वेदितव्येषु भवत्स्वधुना!
अतो विरमामीहैव, प्रणमन् नीरजाक्षरः ॥

२१-२-२००७

दूरभाष:
०१२१-2600122

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ओ३म्

विश्वनीड - ६६३०,
सरस्वती विहार
दिल्ली ११००३४
१८.६.०८

परमश्रद्धेया आचार्यवर्या:

प्रणतिपुरस्सरं निवेदयामि

सप्तसप्ततिवर्षेषु
पूर्णेषु भवदायुष:।
एकस्तु नाम सर्वत्र
विरिवलभुवि मानिनम् ॥१॥

प्रेरयन्तु सदा शिष्यान्
उत्कृष्टकर्मणे मुदा
शतायुषश्च भूयासु:
स्वस्था: सुमनस: सदा ॥२॥

आसन् दिनानि पूर्वाणि
समधुराणि तानि वै।
यामूवं भवच्छिष्यौ
महाविद्यालये तदा ॥३॥

नत्वरितगति: काल:
रोद्धुं केनापि शक्यते।
गच्छत्यसौ स्वयं गत्या
वयं सर्वे तु दर्शका: ॥४॥

एक: कालस्य नेतास्ति
स पूर्वजन्मन: फलम्।
व्यवस्यति स्वयं दातुं
मानवत्तेन बध्यते ॥५॥

विनीत,
[illegible] (वृत्तान्त:)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र काई
INLAND LETTER CARD

आचार्य डॉ. सत्यव्रत शास्त्री,
सी-३५४, डिफेंस कालोनी,
नई दिल्ली
पिन PIN 1 1 0 0 2 4

तीसरा मोड़ THIRD FOLD — प्र.नु. / S.P.P. - 2002

इस पत्र के अन्दर कुछ न रखें NO ENCLOSURES ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

डॉ. कृष्ण कान्त
ई-६३८, सरस्वती विहार, दिल्ली
पिन PIN 1 1 0 0 3 4

जीवन बीमा के दो हाथ, बचत-सुरक्षा दोनों साथ
भारतीय जीवन बीमा निगम
हम जानें भारत को बेहतर
बीमा आज की विशेष-वस्तु है.
Please visit us at:www.licindia.com
NZO-013-99

पहला मोड़ FIRST FOLD

दूसरा मोड़ SECOND FOLD

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

22.1.07.

श्रीः॥ बालवरतः

परमादरणीयेषु शास्त्रिवर्येषु
सादरं सप्रश्रयञ्च प्रणम्यते;
सुलालितभावैः भरितं
पत्रं मनोऽभिरामं समासाद्य।
परमानन्द-द्रवितं
भ्रमरीभूतञ्च मे चित्तम्॥
समाचारं प्राप्तं समुदितयशोभिर्विलसितम्,
समग्रं वृत्तान्तं झटिति पठितं स्नेहिलहृदा।
शुभं वै तन्वाना निखिलगरिमा या विकिरिता,
महान्तः धन्याः वै जगति विरलाः त्वञ्च सहृदाः॥

यदा भवन्तोऽत्र समागतोऽसि
तदा व्यवस्था सुविहिता यदि स्यात्।
सर्वेऽपि पूर्णाः हृदि कामनाः स्युः
समीप्सितं स्यात् सफलञ्च सर्वम्॥

सम्प्रति पठन-पाठनविषयिकी तत्रभवतश्चिन्ता स्वाभाविकी खलु। अहन्तु मन्ये -
अवाहशाश्चेद्विदुषोषु सम्यक्
शास्त्रस्य चर्चां विनियोजयेयुः।
प्रलेखनं स्यात् बहुविस्तरेण
शास्त्रस्य रक्षा भविता तदा वै॥

कालस्तु धावत्यतितीव्रगत्या
लोकोऽस्ति कालानुगतिर्बलीयः।
धनं पदार्थं बहुमन्यमानः
ज्ञाने च ध्यानं नहि दीयते वै॥
अवशिष्टञ्च सर्वकीयं जीवनतमे जीवने यत्-विहित-
-मस्ति, अविष्यति तावच्च कर्तुं न कोऽपि लक्षमः दृश्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

श्रीमद्भिस्तु -

ज्ञानार्जनं प्रौढतमं विधाय
ज्ञानप्रदानेन यशश्च लब्धम्।
साहित्य-सौन्दर्य विकीर्तिं यैः
सवाह शास्त्रे विरलाश्च सन्ति॥

8

अहन्तु दीनः युगलोपशून्यः
~~अस्वास्तु~~ भवांस्तु दिव्योऽतितरः सुकीर्तिः।
किं वर्णयं तत्त्वतविषयेऽकिंचनः
गातुं प्रभातुं नहि शक्तिरस्ति॥

अस्तु, भवतः पत्रन्तु बहुपूर्वमेवाधिगतमासीत्, परं पारिवारिककारणादेव बहिर्गतोऽतमन्यवतः। अतश्च नहि प्रत्युत्तरितम्।

अन्यत् सर्वं सामान्यमेतत्। भवतां वदान्यता-निर्झरम् आशुतोषकल्पां कृपां कामयमानोऽहम्—

Jagannath Shastri
अलवर

44, गंगागिरि, कॉलोनी
अलवर (राज०)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

22.11.2006

श्रीहरिः॥

तत्रभवतां सभादर्शीयानां
अधिकरणानां
विद्वद्वरेण्यानां
श्रीशास्त्रिवर्याणां करकमलयोः
सादरं सविनयञ्च
समर्प्यते—

" साहित्यामृतधिमन्थने सुनिपुणाः
काव्यप्रभाभासिताः ।
व्याख्याने सुविचक्षणाः सुकृतिनः
शीर्षण्यवाग्वैभवाः ।
विद्वन्मान्याः सुधियः सुगौरवयुताः
नाम्ना च सत्यव्रताः ।
शोभन्ते सुकृतैकशास्त्ररसिकाः
श्रीशास्त्रिवर्याः सताम् ॥.

भवन्निष्ठः
वेदान्तशास्त्रिवाग्विशिष्टः

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दीपावली-पर्व-निमित्तमद्य, नमांसि मूर्ध्नांसि मनस्य आर्या: !
स्वस्मिन् मुखेऽथापि च वः समीहे, देहेन सार्धं मनसे सहोऽलम् ॥
स्वास्थ्यं विनाऽन्यत् किमपि क्रियाद्, निःसीम-लक्ष्मी-विभवं यशश्च ।
तेन अन्वन्तरि रार्थकर्था !, दद्याद् मनस्योऽत्र मनस्य दृष्ट्वा ॥
प्रज्ञापराधात् प्रभवन्ति रोगाः, शारीरिका मानसिकाश्च सर्वे ।
प्रज्ञापराधात् न यथा विघ्नो, दद्यात् तथा नः सुमतिं गणेशः ॥
कामादिका आन्तर-शत्रवोऽपि, यथाऽत्र नाश्याद् परि पीडयन्तु ।
तथा बलिष्ठाञ्जिन-कामदेवः, कुर्यात् सदा नः कृपया मदेशः ॥
इदौल-दीपोत्सव सन्दराज्ञो, वर्षे सकृद् मोदयतात् क्रियात् नः ।
ज्ञान-प्रदीपं तु भवः सदैव, वाञ्छापि मान्या ! जगतोऽखिलस्य ॥
अयि परम-श्रद्धेया, डॉक्टर-श्रीसत्यव्रत शास्त्रिण्या: !
भवतां कुशलं वाञ्छन्, सुतरामि प्रणौम्यकुद् भवनः ॥
आलस्ये सुमेरुकल्प; मार्ग-शाघगत्र-जयशंकर-निलाक्षी ।
अवदीयाश्रीर्लिच्छुः, कण्यन (illegible) कविकुरः ॥

दूरभाष: 014/-26401[illegible]

दीपावलिः, वि.सं. २०६८

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दीपावली-पर्व-निमित्तमद्य, नमांसि मूर्योसि भवद्भ्य आर्याः।
स्वस्ति ब्रुवेऽथापि च वः समीहे, देहेन सार्धं मनसे सहोऽलम् ॥
स्वास्थ्यं विनाऽन्यन्न विभाति किञ्चिद्, निःसीम-लक्ष्मी-विभवं यशश्च।
तदेव अन्वन्तरि रार्थकर्थां!, दद्याद् भवद्भ्यो ऽभवतस्य दृष्ट्या ॥
प्रज्ञापराधात् प्रभवन्ति रोगाः, शारीरिका मानसिकाश्च सर्वे।
प्रज्ञापराधान्न यथा विपद्भ्यो, दद्यात् तथा नः सुमतिं गणेशः ॥
कामादिका आन्तर-शत्रवोऽपि, यद्भ्यस्त्रासाद् धरि छोडयन्तु।
तथा बलिष्ठाञ्जिन-कामदेवः, कुर्यात् सदा नः कृपया मङ्गलानि ॥
दीपोत्सव सुन्दरात्रौ, वर्षे सकृद् भोदयतात् क्रियात् नः।
ज्ञान-प्रदीपं तु भवः सदैव, वाञ्छापि मान्या! जगतोऽखिलस्य ॥
अथि परम-श्रद्धेयो, डॉक्टर-श्रीसत्यव्रत शास्त्रिप्रवर्याः!
भवतां कुशलं वाञ्छन्, पुनरपि प्रणौम्यहं भवतः ॥
आलस्ये सुमेरुकल्पः, मार्ग-राघवज्ञ-जयकुर-निवासी।
भवदीयाश्रीर्विजिष्णुः, कृष्णमाचार्यकविरहम्॥

दूरभाष: 0141-2600[illegible]

दीपावलिः, वि.सं. २०६२

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

...चार्य साहित्यरत्न

ग्राम
डारा-नै

ओ३म्

विश्वनीड - ई ६३७,
सरस्वती विहार, दिल्ली-११००३४
१५.१०.०७

परमश्रद्धेया गुरुवर्या:,

प्रणतिपुरस्सरं निवेदयामि

अधिगम्य शुभं पत्रं चिरप्रतीक्षितं तथा।
उदन्तं भवतां ज्ञात्वा सन्तोषमगमन्महम् ॥१॥
चलति पूर्णसप्ताहं ज्वरोऽनिव लघुःखदः।
कार्यं जीवातवः कुर्युः तमज्ञाताः प्रहारिताः ॥२॥

कासस्तस्योपसर्गोऽस्ति प्रतिश्यायो भयङ्करः।
भवतः साम्प्रतं मन्ये ज्वरस्थान कालं गते बुधान् ॥३॥
वार्धक्यं क्षणितं याति स्वल्पकार्यक्षमः पुनः।
इच्छन्नपि न शक्तोऽयं देहो दुर्बलतां गतः ॥४॥
येन पादयुगेनैव पुरा गिरिलङ्घिनः।
तेन साम्प्रतं शक्तोऽहं न सम्यक् चलितुं क्षमः ॥५॥

न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते
व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः।
मम खलु भवतां च स्नेहबन्धोऽस्ति तादृग्
विगतजननमध्येऽप्यावयोः सङ्ग आसीत् ॥६॥

गुरुवरकृपयाहं प्रोन्नतः सर्वदासं
स्थित इव जलनीरे ज्ञानलुब्धो जनः स्यात्।
जलनिधिमहिमानं येन दृष्ट्वेतटस्थान्
जनपथति जनवृन्दान् लीकरैरात्मगत्या ॥७॥

क. पृ. उ.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

यतिम उद्धृ

अपि च बहुप्रणीत शुक्ती: पुरस्यांश्च श्रद्धान

कि किरति नटभूमौ मादृशानां हि तृप्त्यै।
कविगुरुकृतयो मां शिक्षयामासुरत्र
विविधसमयमध्ये या गुरुस्नेहदत्ता: ॥८॥

श्रद्धावनत:,
[illegible]

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

दुर्गादत्त शास्त्री, विद्यालङ्कार, साहित्यरत्न

ग्राम एवं डाकघर-नलेटी
द्वारा-नैहरनपुखर
तहसील-देहरा
जिला-कांगड़ा
(हिमाचल प्रदेश)
पिन 177104
फोन :-01970/45094
दिनाङ्क ../../....98

प्राप्तिकर्त्ता :—

1. राष्ट्रिय पुरस्कार (भारत सरकार)
2. संस्कृत साहित्य प्रथम पुरस्कार-(हि०क०-सं०-भाषा अकादमी)
3. महाकवि श्री वाणभट्ट पुरस्कार-(उत्तर प्रदेश संस्कृत अकादमी)
4. 1994, राष्ट्रिय एकता पुरस्कार-(अ०भा०रा० एकता सम्मेलन)
5. विशिष्ट विद्वान् पुरस्कार-(उत्तर प्रदेश संस्कृत संस्थान)
6. सम्मान प्रमाणपत्र-(महामहिम राष्ट्रपति भारतवर्ष)

सदस्य :—राष्ट्रिय पाठ्य पुस्तक बोर्ड-(भारत सरकार)
यूनीवर्सिटी कोर्ट हि० प्रदेश यूनीवर्सिटी
हि० कला-संस्कृति एवं भाषा अकादमी
] निवृत्त

प्रिय डॉ० सत्यव्रत शास्त्रिणः,

नमस्कृतयः,

वर्षो नवीनः समुपागतोऽयं
मासैः समस्तैः समलङ्कृतः सन्,
भवद्गृहे मङ्गलमातनोतु
प्रभोः प्रसादादिति कामयेऽहम्॥

सस्नेहम्,

भवदीयः- दुर्गादत्तः शास्त्री

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवा में
डा० श्री सत्यव्रत शास्त्रीजी
3/54 रूपनगर
दिल्ली - 110007

First Fold →

Third Fold →
SENDER'S NAME & ADDRESS.

NO ENCLOSURES ALLOWED

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ

(17)

आर्षि विद्वद्गौरेयाः पक्षपक्षी-सत्यव्रतशास्त्रिवराः !
नमोऽभवद्-भवद्भ्यः, सादरमस्मत् पुण्यवद्भ्यः ॥१॥

अत्र सूचना केन्द्रे, द्वित्र-क्षणमात्रमावयोर्मिलितिः ।
स्वल्पोऽपि मधुर-स्मृतौ, संस्थास्यत एव सन्ततौ ॥२॥

किन्तु ततो दिनद्वयेऽस्मन्मात्र-सहितान् भवतोऽर्घ्य-चरणान् ।
सकुटुम्बः सौत्सुक्यं, द्रष्टुं प्रतीक्ष्याधि विह्वलोऽस्मि ॥३॥

किं मात्रस्वास्थ्येन, तूर्णमितः प्रस्थान-कारणमभूत् ?
अथवाऽन्यः कोऽपि हेतु-रिति जिज्ञासेऽत्याकुलोऽहम् ॥४॥

साम्प्रतमत्र कदाऽग्रे, समागमो भविता श्रीपादानाम् ?
येन चिर-साञ्चितो मे, सिध्यतु मनोरथोऽचिरमेव ॥५॥

प्रत्यक्षमेव भवतां, पाणि-पद्मयोः सबहुमानमार्याः !
चाकाङ्क्षेऽपीयेनुभहम्, 'उणादि-पदानुक्रम-कोषम्' ॥६॥

कुटुम्बोऽपि मम मान्याः ! समर्घणेऽस्मिन् सम्मेलितुकामः ।
केनाप्यन्य-कार्येण, प्रतीक्षते ऽत्र भवदागमनम् ॥७॥

अग्रे श्रीमन्त एव प्रमाणं, यथाऽऽदेक्ष्यन्ति भवन्तः ।
तथैव शिरसि सन्धार्यं, विधास्यते मयका सहर्षम् ॥८॥

श्रीमात्रङ्क्ष्यनुयोज्य, वाच्याः प्रणतयोऽस्मदीयाः कृपया ।
तदीय-स्वास्थ्य-वृत्तं, सूच्यं भवद्भिरार्याः ! मुहुः ॥९॥

सत्यावेद्य सादरं, जामं नाममत्र भवतो भवतः ।
श्रीमत्-क्षेम-समीप्सुः, विरमति नीलेश्वर काकेरः

७-३-२००५

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

विद्या - वैभव - भवन
पुष्पेरुकर्ण - मार्ग, रामगञ्ज
जयपुर-302003 (राज.)

दूरभाष :
0141-2600122

सेवा में -
श्रीयुत परमादरणीय
म० म० राष्ट्रपति-सम्मानित
पद्मश्री डॉ० सत्यव्रत जी शास्त्री
सी-248
डिफैंस कालोनी
नई दिल्ली -110024

फोन 24336644,
24336631.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ओ ३म्

निकट नीड - ई ६३८,
लाजपत विहार, दिल्ली ३४
३६.१०.२००।

परमश्रद्धेया गुरुवर्या:

प्रणतिपुरस्सरं निवेद्यते।

पठित्वा वृत्तपत्रेषु विदेशे भवतां श्रुतिम्।
सम्मानाढ्यां परामोदं प्राप्नवानस्म्यहं शुभम्॥
कीर्तिश्चकास्ति सर्वत्र वैदुष्येण शुभा सदा।
वर्धापयामि हृदयं: शब्दैरेतैः प्रमितात्मकैः॥
धुसम्मानितमात्मानं भवत्कीर्त्या मुदा हृदा।
भवद्गौरवमस्माकं मन्येऽहं गौरवं शुभम्॥

भवदीयं शिष्यद्वयं
कृष्णलाल हंस

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

पोस्ट कार्ड POST CARD

प्रो० सत्यव्रत शास्त्री,
सी - २५८,
डिफेंस कालोनी,
नई दिल्ली

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

म. मा. डिग्री कॉलिज
खेकड़ा-२०११०१ (मेरठ) उ. प्र.
२५/१/१९९४

हे महाकवयो मान्याः!
जयतु भारती सदा।
प्रेषिता भवतां पार्श्वे
मयैकाङ्कचमत्कृतिः।
दिनाङ्के द्वादशे तद्धि
पुस्तकं प्रेषितं मया।
प्राप्तं न वा भवद्भिस्तत्,
कृपापत्रेण सूच्यताम्।
रामकीर्तिमहाकाव्य-
रचयितॄन्महाकवीन्,
सादरं वन्दमानोऽयं
पत्रोत्तरं प्रतीक्षते।
—रामकिशोर मिश्र।

Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan

पोस्ट कार्ड POST CARD

सेव्यताम्—

डॉ॰श्रीसत्यव्रतः शास्त्री

3/54, रूपनगरम्,

दिल्ली-7

1	1	0	0	0	7

पिन PIN

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

सेव्यताम् —

डॉ॰श्रीसत्यव्रतः शास्त्री

3/54, रूपनगरम्,

दिल्ली-7

1	1	0	0	0	7

पिन PIN

पोस्ट कार्ड POST CARD

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ए/१२५० विजयपार्क
मौजपुरम्, दिल्ली ११००५३
दि. २४/३/२००४ ई०

माननीयेषु डाक्टरवर्येषु

सादरं विलसन्तु सप्रणतयस्तव।

राष्ट्रियवार्तासेवाप्रकोष्ठाध्यक्षमेनङ्विद्यायप्रभूतं प्रसीदतु मे मनः यत् कनाडासंस्थितेभ्यः आन्तरराष्ट्रियं भारतीयोद्याध्यक्षपदसोच्यानं कालिदासपुरस्कारेण भवन्तं पुरस्कृत्यात्मानं गौरवान्वितं मन्ये।

वस्तुतः सरस्वतीसमाराधनात् तस्याः सामयिकसक्रियलोकप्रियाभ्यां इदं कित्यन्तया च ज्ञानधनेन निर्देष्टुं असमर्थोऽयं सदाशयः स्वीकृत्यानुरूपमेवायं सम्मानपुरस्कारः।

आम्भे, प्रसीदतु चिरं भवदभ्यर्थनाम् ओलिकसंस्कृतलोकेन संस्कृतपाठ्यक्रमं प्रस्तुतं कुर्वीतेति —

विद्याव्रताय विद्याय विद्याविदमौक्तिकाय च,
व्याडमोदाय विद्वांसं श्रीसत्यव्रतशास्त्रिणे।
कालिदासपुरस्कारः उपस्कारो महौजसे,
कनाडाराष्ट्रियैः शिष्टैः प्रदत्तो महते मुदा।
कनाडासंस्थितं भव्यं संस्कृतं सार्वभौमिकम्,
भारतमूलविद्यानां सम्मानयति सादरम्।
व्याडेवात्मजं विद्वांसं श्रीसत्यव्रतशास्त्रियम्,
पितुः पदानुवर्तं पुत्रं सम्प्राप्तुस्ते पुरस्कृतिः।
नवीनपाणिनेः पुत्रः कालिदासो नवोऽधुना,
रामकीर्तिमहाकाव्यं कृतेऽसौ सर्वं रक्षुरः।
वर्द्धिष्णुं भुवि दीप्यन्तं श्रीसत्यव्रतशास्त्रिणं
नरदेवः शुभाशंसी सर्वदा सुतिसम्बलः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र काई
INLAND LETTER CARD

सेवा में :—

डा. सत्यव्रत शास्त्री
3/54 रूपनगर
दिल्ली

पिन PIN 1 1 0 0 0 7

पहला मोड़ FIRST FOLD

तीसरा मोड़ THIRD FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

नवेद शास्त्री
दिल्ली विश्वविद्यालय

पिन PIN

खोलने के लिए संकेत TO OPEN CUT HERE

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

ओ३म्

डॉ कृष्ण लाल
निवनीड - ई ६१७,
सरस्वती विहार दि. पी. - ११००३४

१. १०. २००३

परमश्रद्धेया गुरुवर्याः,

सादरं प्रणम्य ब्रवीमि।

प्रमोदावहोऽयं प्रकर्षं ननोति
मनो मे प्रकामं प्रफुल्लं करोति।
पुरस्कारमाचस्तु जैनीयलब्धः
सदा सन्हि सम्मानयोग्या महान्तः॥

भवदीयः

(कृष्णलालः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

२३७६

१३.७.२००४

सुधीवर-श्रीयुत-चारुदेव,-प्रियात्मजान् पण्डित-प्रद्युम्नान् हि ।
सत्यव्रतान् दिल्लि-निवासिनोऽहं, सभानमानम्य निवेदयामि ॥ १॥
पितुर्जयन्त्यां भवदीय-भव्यं, सन्देशमासाद्य दिनेऽद्य मान्याः!
आनन्द-सन्दोहमसीममत्र, पार्श्वत्-सदस्यैरनुवो भजीमि ॥ २॥
गङ्गाधरान् पण्डित-प्रद्युम्नांश्च, सौमत्क-सन्देशामितो दिशामि ।
स्वीया मतीस्तेऽपि च मन्मुखेन, सम्प्रेषयन्तेऽत्र भवद्-भवद्भ्यः ॥ ३॥
अपात्रता-धृग् लभते प्रतिष्ठां, सुपात्रता-धृग् लभते च ताँ न ।
सदानुभूतिर्मम चात्र पूर्णा, विवेचिते मान्यवरा! भवद्भिः ॥ ४॥
प्रवाञ्छितानां! कतिशो भवद्भिः, प्रकाशकैर्दुष्प्रजलैस्तदेतत् ।
ज्ञात्वाऽति खिद्ये प्रतिकार्यमत्र, कथं तदेतन्नु विचिन्तनीयम् ॥ ५॥
प्रकाशकानां विषयेऽस्ति या मे, सन्धारणा, सा भवतामपीह ।
अस्यां स्थितौ लेखक-काशि-सम्यग्, सुरक्षिता हा! कथमत्र तिष्ठेत्? ॥ ६॥
एतत्-समाधानमहन्तु मान्याः!, शोचं हि शोचं नहि लोकधामि ।
गवेषयित्वा कृपया क्रमेण, लिखन्तु मान्यार्य-वरा भवन्तः ॥ ७॥
श्रीमन्त आर्या बहु-विघ्न-विद्या-लयीय-पाठ्यक्रम-सञ्चलाश्च ।
अतोऽस्मदीया अपि तत्र काश्चित्, सम्मेलयन्त्यद्य कृतीः समीक्ष्य ॥ ८॥
सर्वा अनुस्ताः कृतयो भवद्भ्यः, सभर्पिताः सन्ति समीक्षणार्थम् ।
लेख्याः समीक्षाः क्रमशश्च तासु, पाठ्यक्रमे ताश्च पुनर्निवेश्याः ॥ ९॥
पादाब्जयोर्मे प्रिय-पूज्य-मातुः, प्रस्तौतु भार्याः! प्रणतीः प्रभूताः ।
बद्धाञ्जलिर्भोः! विनयेन सार्धं, निवेदयेऽहं प्रणमन्तु भवत्सु ॥ १०॥
अतो भवन्तः कृपया समेताः, निवेदयन्तां प्रणतीस्तु तस्यै ।
शुभाशिषं राशिमिरत्र मातुर्, मोमोत्ति तुच्छोऽधिजनो न कः कः? ॥ ११॥
विशेषवेषेऽत्र मयि स्थितेऽपि, प्रवर्तते यत्ते सत्यं न मोहि ।
तेषां न पात्रत्वमहं वदामि, बिभर्मि तुच्छो, न मृषा वदामि ॥ १२॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

तथापि शब्दैर्निहितं वर्णनीयो
यः स्नेह-राशिर्भवतां मयीह ।
स्व-पूर्व-जन्मार्जित-पुण्य-राशि-
निमित्तमस्मै कथयामि मान्याः ! ॥१२॥

आर्याः सभार्याः सुचिरं भवन्तः
सन्तुष्टिमन्तो यशसा श्रिया च ।
स्वस्थाः शरीरे च तथैव चित्ते
जीव्यासुरित्येतदहं सदेहे ॥१३॥

एतावदेवाद्य निवेद्य मान्याः !
स्वकीय-हार्दं विशदं भवत्सु ।
भवत्-कृपेप्सु विरिभामि तावद्
विनीत-[illegible] ॥

१३-७-२००४

महामहिम-राष्ट्रपति-सम्मानित
आचार्य व०म० पण्डित श्रीनवल किशोर काबरा
संस्कृत-सेवा परिषद्,
जयपुर (राज.)
कार्यालय
विद्या-वैभव-भवन
[illegible]-मार्ग, [illegible]
जयपुर-302[illegible] (राजस्थान)



प्रतिष्ठा में,

महामहिम-राष्ट्रपति-सम्मानित
पद्मश्री-विभूषित महामहोपाध्याय
परम-श्रद्धेय पण्डित-प्रवर
डॉ० श्री सत्यव्रत शास्त्री जी
सी-248, डिफैंस कालोनी
नई दिल्ली-110024

फोन: 24336644,
24336631

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Hyderabad. 16
15/1/04

श्रीचक्रधरपण्डितकविरत्नसत्यव्रतशास्त्रिभ्यो नमांसि

अथ -

अथ दिनाङ्कसहितं पत्रं प्रारभ्यते

भवत्कं प्राप्य अत्यन्तं सम्मुदितोऽस्मि।

कार्यानुषङ्गो गुरुभारयुक्तः
अथेत्सदा लोकविलोकनानाम्।
अवाङ्मुखानामिति दुःखभाजनं
किमत्र? सञ्जोदृङ्मेव मन्ये ॥ 1

यदा कदाऽपि स्वजनं स्मृतेरितः
तदात्मनिन्दा प्रकटप्रकारो।
माऽभूत् भवद्दृश्यः गवदृश्यः सजसोपकृद्दृश्यो,
न वा ममाऽसीत् तदृषेतभावः ॥ 2

अमैव कालस्य तु रावणोद्यमं
जिवेदृयिष्यद्कपतिं हृतानहृग्।
गतस्य पत्रस्य विलेखनार्थम्
यदात्मसंतुष्टिकरं तदासीत् ॥ 3

संप्राप्य लेखं समुदारबुद्धेः
संप्रेषितां मद्, मुदा समन्वितः।
अवामि, किं वा लिखेयुं ममाऽस्ति?
रिक्तो न मैत्री भवतान्विरोऽौ ॥ 4

कालः प्रकामं लिखनाद्रजत्यहो,
संप्रेषणार्हं लिखतो हि पत्रम्।
एतावती मे भवतीह चिन्ता
तदा तदा, माऽस्तु निराकृतिस्तथा ॥ 5

अद्भूतं निर्मितमस्ति काव्यं
नन्दितबुद्ध्यवणप्रमोदः।
योऽयं ममाऽऽशा मिति नित्यवाञ्छितम्
भवत्यतीतं, भवितव्यतीतम् ॥ 6

PTO

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

प्रो. शिवजी-उपाध्यायः
PROF. SHIVJI UPADHYAY
प्रति-कुलपतिः
Pro-Vice-Chancellor
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
Sampurnanand Sanskrit University
वाराणसी - २२१००२
Varanasi - 221002

दूरलेखः : 'श्रुतम्'
Grams : "SHRUTAM"
दूरभाषः : (०५४२) २०४५५७ निवास
Phone : (0542) 204557 Resi.

पत्राङ्कः .....
No.....
दिनाङ्कः २५-२-०३
Date.....

॥ श्रीः पातु ॥

आदिसेवम् -
प्रो॰ सत्यव्रतशास्त्रिणः
दिल्ली,

श्रीमन्तः शास्त्रिणो मान्याः! सप्रणामं निवेद्यते।
चिरमम्बादौत्रं पत्रं दीयते क्षम्यतां ननु॥

यथालब्धं भवदभिरक्षात्यूहितं पत्रकं मम।
कालात्ययतया हन्त! तथन तदभवतो मया॥

किन्तु कालो बलीयानप्यविज्ञिकरश्च सः।
भवादृक्सुयशोभृति विबुधवरविभूतिषु॥

अवश्यं स्वानुकूलत्वादभीष्टं विषयोचितम्।
निबन्धं विरचय्याञ्च प्रेषयन्तु विपश्चितः॥

श्रीमद्विद्यानिवासस्य काशिकेयमनीषिणः।
नाभिनन्दनसम्मूर्तिर्भवादृग्लेखमनारा॥

एकदैवद्विधैवासौ भवत्साक्षात्कृतिर्मम।
सौहार्दहार्दसंवादसंस्मृतिं पर्यकल्पयत्॥

मूर्योऽप्यभ्यर्चये चानो स्वानो न प्राणिवेदयन्।
मूनं गद्यात्मपद्यात्मलेखबन्धः प्रहीयताम्॥

स्वास्थ्यमारोग्यमायुष्यं माङ्गल्यं कीर्तिसौरभम्।
सर्वतो भवतो भावान् भवतो भावयत्वलम्॥

वि॰ सं॰ २०५०
माघकृष्णत्रयोदशी

शिवजी उपाध्यायः

E-mail : vcssvv_vns@satyam.net.in ❖ Website : www.sanskrituniversityvaranasi.com

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

(30)

Ch. S. RAO
Advocate & Senior Counsel

C/o Sri Ch. Ramnath
G.M - SBH

Flat No. 102, Lotus Flora Apts
Prakasam nagar.
Begumpet.
Hyderabad (AP)
Pin 500016.

HIG 41. BALAJI NAGAR COLONY (APHB)
KUKATPALLY
HYDERABAD - 500072
TEL.: 3053359 / 3732315

11- 11- 2004.

Telephone: 27766623

Dear friend,

यन्मया लिखितं पूर्वं अनुरोधविधायुतम्।
तद्विस्मर्यतां भवता, भवेद्धि०यं यतस्ततः॥ 1

अधुनोपस्थिता दीपावल्युत्साहमहोत्सवः।
समग्रप्रभेदी-यानन्दुदीपकान्तियैभवः॥ 2

यो नरकासुरारातिसंज्ञा[illegible]
श्रीकृष्णः सत्यभामासमेतो हि नकरोऽवतु॥ 3

वैदर्भ्यः सपत्नी सा सत्यभामाऽऽन्ध्रभामिनी।
विद्वेषेति स्थितस्तस्याः प्रेमोद्धारकथे हृदि॥ 4

तदुद्धारकथा वाक्ये मम प्रीतिकरी भृशम्।
मातृभाषागृहीता च रम्यनाटकरूपिणी॥ 5

आनन्दुवर्धनी साऽभूत्, किन्तु सत्यैकसंभृता।
सन्मतिः केशवस्यासीत् नरकासुरवधानुगा॥ 6

साफल्यं दिशतादुस्माकं दांपत्यं नयो भुवि।
प्रसन्नं प्रार्थनायायि भूयो भूयः सरोद्वहम्॥ 7.

आद्येते लिखिताः श्लोकाः छन्दोबद्धाः बुधोत्तम।
दिशन्ति मच्चेतसे ते शुभवेलोन्मीलितं शमम्॥ 8.

With best wishes and kind regards,

Yours sincerely,
Ch. S. Rao.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

मम स्वाध्यायप्रवृत्तिविवरणपत्रम्

वामलूरुतनयामृतं शिरा-
कालिदासपदसारसौरभम्।
शाङ्करार्यभुवि भूयसी प्रभा
संभवेतु मम जन्मजन्मनि॥ 1

पोतनार्यकृतिपूजनेच्छिनी-
वैरमरी विनतमातृभक्तिता।
श्रीपदाङ्कितसुभक्तिरञ्जिता
धन्यताऽस्तु मम जन्मजन्मनि॥ 2

"पेक्षियं" मृदुतरार्द्रता हृदः
मानवत्वधनमान्यता मम।
स्फूर्तिदा मतिमतां मतिर्मता
साऽध्व मे द्विशतु जन्मजन्मनि॥ 3

सानेडुक्रमितमानसांतरे
बंभ्रमीति मम चञ्चरीकवत्।
भूषणं "पेक्षियं" विदुनतोरणम्
चाद्विती[illegible] पद्यकविद्रुपणम्॥ 4

एतदद्यतनकर्मचोदनं
काव्यशिल्पमरतजीविनो मम।
प्राग्यथाऽभवदुदारभक्तिभ-
द्वङ्गभारतिरवीन्द्रघोरणी॥ 5

वासुदेवचरितासवामृत-
प्रोद्यदुज्ज्वलघटायितं च मे।
काव्यमर्घघटितं च सांप्रतम्
सक्मिणीपरिणयामिशोभितम्॥ 6

वैनतेयकृतवेगसंवृतो
यानि कातरयचक्रनेमिर-।
प्यत्र नित्य विचरिष्णुरस्म्यहं;
मादृशां केवलं नमः॥ 7

श्रीपदार्चने योग्यतावहं
श्लोकनिर्मितं नाममाश्रितम्।
काव्यमस्त्ययुतरूपधायिकं
मातुरस्तु तत् प्रीतिदायकम्॥ 8

सूर्यसन्निभः कोमलाशत-
श्लोकवर्षिणी भक्तिवर्धिनी।
मामकीनगलसंभृता भवेत्
[illegible] 9

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

मम स्वाध्यायप्रवृत्तिविवरणपत्रम्

वामतूरुतनयामृतं शिरम्
कालिदासपदसारसौरभम्।
शाङ्कराद्यभृतवाङ्मयप्रभा
संभवंतु मम जन्मजन्मनि ॥ 1

पोतनार्यकृतिपूतलेखिनी-
वैरमरीविनतमातृभाषित-।
श्रीपदाङ्कितनस्भक्तिरञ्जिता
धन्यताऽस्तु मम जन्मजन्मनि ॥ 2

"पेक्षियर"मृदुतरार्द्रहृद्
मानवत्वघनमान्यता मम।
स्फूर्तिदा तरसि मूर्तिमन्तया
साऽस्तु मे द्विशतजन्मजन्मनि ॥ 3

सानेदुक्तमितमानसांतरे
बंभ्रमीति मम चञ्चरीकवत्।
भूषणं "पेक्षियर"वंदुनोरणम्
चाद्विनीयमतिदुर्पणम् ॥ 4

एतदुद्यतनकर्मचोदुनं
काव्यशिल्परतजीविनो मम।
प्राग्यथाऽभवदुदारभक्तिम-
द्वङ्गभारतिरवीन्द्रघोरणी ॥ 5

वासुदेवचरितासवामृत-
प्रोद्यदुज्ज्वलघटायितं च मे।
काव्यमर्घघटितं च सांप्रतम्
रुक्मिणीपरिणयाभिशोभितम् ॥ 6

वैनतेयकृतवेगसंवृतो
यानि कालरथचक्रनेमिर-।
प्यत्र विचरिष्णुरस्त्यहं;
मादृशां केवलं नमः ॥ 7

श्रीपदार्चने योग्यतावहं
श्लोकनिर्मितं नाममाधितम्।
काव्यमस्त्यकृतरूपधायिकं
मातरस्कृतनरीतिदायकम् ॥ 8

सूर्यसन्निभकोमलाशत-
श्लोकवर्षिणी भक्तिवर्धिनी।
मामकीनगलसंभृता भवेत्
चेयमंतनतेऽस्तु साधुसाधनम् ॥ 9

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

एतद्द्वयी नम्रकविनवधारा-
कृतीणतेऽद्या धरते समर्पिता।
अपेक्षते मुद्रणतामभेव
क्रमेण सेयं मम तीर्थयात्रा॥ 10

यावद्भवेन्मे जगतोऽनुषङ्गः
तावद्भवेन्मे भगवान् सहायः।
यावद्भवेन्मे भगवान् सहायः
तावद्भवेन्मे कविर्तोऽनुषङ्गः॥ 11

विवरणम: ① वामनकृतनयः = वाल्मीकिः।
② कृती = पुण्यवान्।
③ नैवेत्यत्र हंसादुरमुच्यताम्।
④ ललितासहस्रनामस्तोत्रं पुरातनमस्ति। तथैव मयूरमङ्कवेः सूर्यशतकम्। मम स्त्रीमानसहस्रेण च सूर्यस्तोत्रमप्रत्यग्रकाव्यद्वयं भवतः। एते द्वे काव्ये मम स्वीयरचने, न तु नवकवेः इति विज्ञप्तिः।

चिं॥ सू॥ रा॥
(Ch. S. Rao)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

(30)

डॉ. रामकृष्ण सराफ
एम.ए.;एल.एल.बी.;शास्त्री पी-एच.डी.
पूर्व प्राचार्य (उच्च शिक्षा, मध्यप्रदेश शासन)

आवास : ई-7/562 अरेरा कॉलोनी,
भोपाल (म.प्र.) - 462 016
दूरभाष : 2424624

दिनांक 12.12.2006

आदरणीया: डॉ महाभाग:

सस्नेह सप्रेम नमो नम:।

पत्रं प्राप्य कृतज्ञोऽस्मि विद्यते मम कामना।
शतायुषो भक्ता: स्यु: स्वास्थ्यं भवतु सौख्यदम् ॥1॥
वाग्देवार्चा व्यापृता: सन्तु सदा मृदंयान्तु यशस्विताम्।
सुकृतिनो भक्तो हि कीर्तिर्दा कृतिसम्पदा ॥2॥
मत्कृतेर्विषये भावा भवद्व्यक्ता: समीक्षणे।
नो सन्ति केवलं भाव: शुभाशीर्लाञ्छनं हि व: ॥3॥
भवभूतिं समभ्यर्च्य सकरिष्ये येन भाटके।
प्राक्तानि यानि वाक्यानि भजन्ते तानि मित्रताम् ॥4॥
लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥5॥

नववर्षकृते मङ्गलकामनाभि: सकम्पम्।
सप्रश्रयम्।

भवदीय:
Cहो

डॉ० सत्यव्रत शास्त्रिण:
सी-248 डिफेंस कॉलोनी
न्यू दिल्ली (110024)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

Ch. S. RAO
Advocate & Senior Counsel

% Ch. Rammath,
L-B, Madhuban,
Gen. J. Bhosale Marg.
Mumbai-Pin 400021

HIG 41, BALAJI NAGAR COLONY (APHB)
KUKATPALLY,
HYDERABAD - 500072
TEL.. 3053359 / 3732315

श्रीमत्सत्यव्रतेशास्त्रिमहोदयानामभिवादयेशनम् ।

चिरकालनिरस्तोऽप्यदा संतोषो जायते बहु ।
अनादृशस्य हंसस्य प्रच्युतौ मे गतिर्विशिष्यते ॥

मनोदृमाख्यानां निर्भाषाणां संस्कृतस्य वै ।
प्राधान्यगता नद्धायाः पट्टिकायाः इदं स्फुटम् ॥
तावद्वानामृतं भाति मणिवत्क्षण्यमेव हि ।
भवत्स्वन्येषु काव्येषु मत्कृतेषूदितं दृशम् ॥
यथं संप्राप्तमेतावत्, पठितं भवताऽपि यत् ।
नदृस्ति प्रथमं कर्णरसायनमिवोचितम् ॥
जनकस्तनयप्राप्त्या ~~मम~~ तन्मेतानन्दुमेव तत् ।
तत्प्रशस्तिश्रवणात् किन्तु न प्रसूत्या तथाविधम् ॥

अत एव भवादृशपण्डितलक्ष-
द्वितयान्यमुरुमण्डनोचितप्रभाव ।
कलितानां सुहृदमपेक्षमाणः सन्
विहराम्यहमेतत्सहायतासाधनः ॥

निधयो बहवोऽप्येवमस्तोकं न्यासतस्तु च ।
पुरस्कारप्रदानार्थपात्रनिर्णेतृताभृतः ॥
अनादृशा भवन्त्येव न्यासपात्रसहायकाः ।
प्रतिपादनसमुत्साहा वा तिष्ठन्ति सभाग्यके ॥
तस्माद्बुद्धं न तिस्मार्चः; विस्पष्टिः व्याहृता मया ।
नर्षीयान् दूरसंस्थोऽहं; इयता चैव तृप्तिभाक् ॥

भगवत्याः कृपा मेऽस्ति जागर्त्येषा च मानुषीं ।
तनुमाश्रित्य वर्तेत तत्कृपाऽपीति मे मतिः ॥
यथा तथा भवत्तेव, प्रत्यक्षो मेऽसि, मामकं ।
आलम्ब्य कटमेवानुक्षणं नश्यति मक्षिका ॥
या कुर्यात् भवतामेव कटार्थं जननी ध्रुवं ।
अनिमेषस्वभावं च साहार्द्यं सर्वमङ्गला ॥

— एवं बुधजनविधेयः

चिन्तनीयः सदा सर्वैराशीर्वादः शुभेच्छुकः ।
(Ch. S. Rao)

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

(30)

Ch. S. RAO
Advocate & Senior Counsel

C/o Sri Ch Ramnath
Gth-589

Flat No. 102, Lotus Flora Apts
Prakasam nagar.
Begumpet.
Hyderabad (AP)
Pin 500016.

HIG 41. BALAJI NAGAR COLONY (AP)
KUKATPALLY
HYDERABAD - 500072
TEL.: 3053359 / 8732315

11-11-2004

Telephone: 27766623

Dear friend.

यन्मया लिखितं पूर्वं अनुरोधविधायुतम्।
तद्विस्मर्यतां भवता, भवेद्धन्यं यतस्ततः॥ 1

अधुनोपस्थिता दीपावल्युत्साहमहोत्सवः।
तमःप्रभेदी जानन्दुदीपकान्तिरवैभवः॥ 2

यो नरकासुरारातिसंज्ञा[illegible]।
श्रीकृष्णः सत्यभामासमेतो हिनकरोऽवतु॥ 3

वैदर्भ्यः सपत्नी सा सत्यभामाऽऽन्ध्रभामिनी।
विद्वेषेति स्थितस्तस्याः प्रेमोद्धारकथे हरिः॥ 4

तद्दुद्धारकथा वाक्ये मम प्रीतिकरी भृशम्।
मातृभाषागृहीता च रम्यनाटकरूपिणी॥ 5

आनन्दुवर्धनी साऽभूत्, किन्तु सत्यैकसंभृता।
सन्मतिः केशवस्यासीत् नरकासुरवधानुगा॥ 6

साफल्यं दिशतादुस्माकं दांपत्यं नयोर्भुवि।
प्रसन्नं प्रार्थनादायि भूयो भूयः सरोजदृहम्॥ 7.

आदेवेते लिखिताः श्लोकाः छन्दोबद्धाः सुधोत्तमम्।
दिशन्ति मच्चेतसे ते श्रेयभवेत्तोन्मीलितं शमम्॥ 8.

With best wishes and kind regards,

Yours sincerely,
Ch. S. Rao.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

(30)

Ch. S. RAO
Advocate & Senior Counsel

C/o Sri Ch. Ramnath
Q.M. - SB9

Flat No. 102, Lotus Flora Apts
Prakasam nagar.
Begumpet.
Hyderabad (AP)
Pin 500016.

HIG 41. BALAJI NAGAR COLONY (AP HB)
KUKATPALLY
HYDERABAD - 500072
TEL.: 3053359 / 8732315

11-11-2004.

Telephone: 27766623

Dear friend,

यन्मया लिखितं पूर्वं अनुरोधविधायुतम्।
तद्विस्मर्यतां भवता, भवेद्धास्यं यतस्ततः॥ 1

अधुनोपस्थिता दीपावल्युत्साहमहोत्सवः।
तमःप्रभेदी-आनन्ददीपकान्तिरयैभवः॥ 2

यो नरकासुरारातिसंज्ञा[illegible]
श्रीकृष्णः सत्यभामासमेतो हि नरकेऽवतु॥ 3

वैदर्भ्यः सपत्नी सा सत्यभामाऽऽन्ध्रभामिनी।
विद्वेषतिस्थितस्तस्याः प्रेमोद्धारकथे हरिः॥ 4

तदुद्धारकथा वाच्ये मम प्रीतिकरी भृशम्।
मातृभाषागृहीता च रम्यनाटकरूपिणी॥ 5

आनन्दवर्धनी साऽभूत्, किन्तु सत्यैकसंभृता।
सन्मतिः केशवस्यासीत् नरकासुरवधानुगा॥ 6

सा फलत्यं दिशात्तस्माकं दंपत्यं नवो भुवि।
प्रसन्नं प्रार्थनाद्वाये भूयो भूयः सदेवहम्॥ 7.

आदेवेन लिखिताः श्लोकाः छन्दोबद्धाः बुधोत्तम।
दिशन्ति मच्चेतसे ते शुभवेलोन्मीलितं शमम्॥ 8.

With best wishes and kind regards,

Yours sincerely,
Ch. S. Rao.

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-0. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan

Digitization and

वि.सं. २०६८

दीपावलि-मङ्गलकामना

अयि सुधी-शिरोमण्यो, नमः सभाभ्यो भवद्भ्यो नमः।
लक्ष्मी-मातुः कृपया, स्वप्सितं सर्वं सुलभमस्तु॥
दीपमालिका भूयात्, सकुटुम्बाय भवते मङ्गलमयी।
वितरतु लक्ष्मी-माता, मुक्तहस्तं स्वप्सितमखिलम्॥
धर्मार्थ-काम-मोक्षा, यद् विना न सिद्ध्येयुरिह कदापि।
तदेव वितरतु लक्ष्मीः, स्वस्थं सुदीर्घायु भवते॥
पुनः स्व-हार्दमपीदं, प्रस्तोतुमुद्यतः सहृदयवरे भवति।
लोभ-संवरणेऽक्षमः, क्षमां याचेऽहमार्य सुधवर!॥
बाह्य-तम औषधिकमेव, मृत्-तैल-विद्युद्-दीपा निघ्नन्ति।
परं ज्ञान-दीप एव, सबाह्यमान्तर-तमो निहन्ति॥
ज्ञान-दीपोपलब्धौ, द्रव्य-व्ययोऽपि न करणीयो भवेत्।
परमन्य-दीपा द्रव्य-व्ययं विना नोपलब्धाः स्युः॥
अन्य-दीपाः प्रकाशं, सदा वितरन्ति न जनेभ्यः कदापि।
परन्तु ज्ञान-दीपो, वितरति प्रकाशं नित्यमेव॥
निर्वान्त्यन्ये दीपा, ज्ञान-दीपो न च निर्याति कदापि।
ज्ञान-दीपो यस्यैक, तमो-दोषः पीडयति तं न॥
ज्ञान-दीपमिमं सर्वे, आप्नोतु मातृ-लक्ष्मी-प्रसादतः।
येन मिथोऽज्ञान-तमो, बाधतां नैव कदापि कमपि॥
अज्ञान-तम-आवृताः, एव मिथो युध्यन्ते स्वार्थ-कृते।
स्वार्थ एवास्ति सर्वानर्थानां जनकः सर्वदा॥
भिन्न-देश-दिङ्मोहिता, स्वसंस्कृत्याचार-विचार-हानिः।
स्वदेश-भूषा-भाषा-त्यागः सर्वः स्वार्थ-जातः॥
स्त्रीणामप्रहतिस्तासु, बलात्कृतिः पुनस्तासां हत्याऽपि।
गर्भ एव कन्या-वध, इत्यादि-दोषाः स्वार्थजा हि॥
आतङ्कवाद-प्रसार, पर्यावरण-प्रदूषणयोर्जनकः।
सैष स्वार्थ एवास्ति, निखिल-विश्व-मानितो हेतुः॥
समाज-देश-राष्ट्र, विश्वेषु प्रशास्ति स्वार्थ सदाद्य।
अत एव मानासुरको, भ्रष्टाचारो व्यथयति कं न?॥
संस्कृताद्यत-शिक्षैव, स्वार्थ-नाशक-ज्ञानमुत्पादयेत्।
शिक्षेत-संस्कृत-जनो, निःस्वार्थो भ्रष्टमाचरति न॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

यहाँ से मोड़ें HERE TO OPEN CUT HERE

सेवा में,
श्रीयुत परमादरणीय डा० सत्यव्रत शास्त्रीजी
डी-2748, डिफेन्स कॉलोनी
नई दिल्ली
पिन PIN 1 1 0 0 2 4

दूसरा मोड़ SECOND FOLD

P.B. / S.P.P. - 2002

तीसरा मोड़ THIRD FOLD

इस पत्र के अन्दर कुछ न रखें NO ENCLOSURES ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

नारायण कृष्ण कांकर

विद्या - भवन - भवन
सुमेरकॉलेज, राम मार्ग
जयपुर-302003 (राज.)
पिन PIN

पहला मोड़ FIRST FOLD

निःस्वार्थे जने पुनः, भवन्ति न कदापि प्रवॉक्त-दोषाः।
ततः स्वयमसौ हि सुरभी, परेषामधि न क्षिपति सुरभम्॥
अतो हि ज्ञान-दीपं, प्रज्वाल्याज्ञान-तमो-विनाशने।
प्रवर्तितां कृतामेषा, माता लक्ष्मीः कृपया जागर्ति॥
ज्ञान-दीपेन विविच्य, कार्याकार्यं स्वं कर्म मनुष्यः।
कार्यं हि कर्म कृत्वा, भवतु सुरभी सुरक्षयतु चापरान्॥
यस्माद् मनुष्य-योनौ, जन्मोपलब्धिः भवितु सार्थिकाऽत्र।
अन्यथा पशुरिव कर्म, शीलेऽत्र पशौ च भेदः कः?॥
इदमेव चिन्तायित्वा, विश्व-कल्याण-कामनया सदैव।
अधि श्रद्धेयवर्यैः, श्रीसत्यव्रतशास्त्रि-महाभागैः॥
इदानीमिमां लक्ष्मीं, मातरं प्रयुज्य प्रथम्य चेत्यैव।
पुनः पुनर्याचेऽहं, विनीत-नारायण कांकरः॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitised By Siddhanta eGangotri Gyaan Kosha

२१.४.२००५ दिनाङ्के कुरुक्षेत्रस्थान् डा० रणवीरसिंहमहाभागान् प्रति प्रेरितं पत्रम्

दूरभाष-
२४३३६६४४
२४३३६६३१

ई - २४४, ग्रेटर कैलाश कालोनी,
